ISBN : 978-81-936460-6-9

# आम्नायहैमवती

## द्वितीयोऽङ्कः-2018

(वैदिकज्ञानविज्ञानसम्भृता मूल्याङ्किता राष्ट्रियशोधपत्रविशेषाङ्कः)

प्रधानसम्पादकः
प्रो. के.बी. सुब्बरायुडुः
प्राचार्यः

सम्पादकः
डॉ. शैलेन्द्रप्रसादउनियालः

वेदविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
(संसदः अधिनियमेन स्थापितः, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः)
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः

ISBN : 978-81-936460-6-9

# आम्नायहैमवती

**द्वितीयोऽङ्कः - 2018**

**( वैदिकज्ञानविज्ञानसम्भृता मूल्याङ्किता राष्ट्रियशोधपत्रविशेषाङ्कः )**

प्रधानसम्पादकः
**प्रो. के.बी. सुब्बरायुडुः**
प्राचार्यः

सम्पादकः
**डॉ. शैलेन्द्रप्रसादउनियालः**

**वेदविभागः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**( संसदः अधिनियमेन स्थापितः, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः )**

**श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः**

**पौडीगढवालः, उत्तराखण्डः - 249301**

प्रकाशक:
प्राचार्य:
**केन्द्रीयसंस्कृतविश्वविद्यालय:**
(भारतसर्वकारस्य शिक्षामन्त्रालयाधीन:)
श्रीरघुनाथकीर्तिपरिसर:, देवप्रयाग:, पौडी-गढवाल:-249301 (उत्तराखण्ड:)
दूरभाष 01378-266028
ई मेल : srkcampus@gmail.com
वेबसाईट : www.srkcampus.org

परामर्शदातृमण्डलम्
1. **प्रो. बलमालीबिश्वाल:**–व्याकरणविभागाध्यक्ष:
2. **प्रो. मनोज कुमार मिश्र:**–वेद विभागाध्यक्ष:
3. **प्रो. विजयपालशास्त्री**–साहित्यविभागाध्यक्ष:
4. **डॉ. आर.बालमुरुग:**–न्यायविभागाध्यक्ष:
5. **डॉ. कृपाशङ्कर शर्मा**–साहित्यविभाग:
6. **डॉ. दिनेश चन्द्र पाण्डेय:**–साहित्यविभाग:
7. **श्रीओमशर्मा**–व्याकरणविभाग:

© वेदविभाग:, श्रीरघुनाथकीर्तिपरिसर:, देवप्रयाग:

प्रकाशनम् : 2019

प्रथमसंस्करणम् : 200 प्रतय:

ISBN : 978-81-936460-6-9

मुद्रक:
**डी.वी. प्रिंटर्स**
97-यू.बी., जवाहर नगर, दिल्ली-110007



# शुभाशंसनम्

## ''आम्नायहैमवती प्रसरतु''

राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्थेन वेदविभागेन विभागीय शोध सङ्गोष्ठीशोधपत्रिका ''आम्नायहैमवती''ति नाम्ना विशेषाङ्कः प्रकाश्यते। वर्षेऽस्मिन् फरवरीमासस्य 1–2, दिनाङ्कयोः द्विदिवसीयराष्ट्रियसङ्गोष्ठ्यां नैके विद्वांसः स्वकीयवैदुष्यपूर्णानि शोधपत्राणि प्रापठन् तानि शोधपत्राणि सङ्कलय्य सामाजिकलाभाय छात्राणां हिताय च प्रकाश्यन्ते।

वेदविभागस्य द्वितीयोऽङ्कः श्रीरघुनाथकीर्तिपरिसरस्य वैदिकसंस्कृतिकीर्तिपताकां व्योम्नि चन्द्रतारकवत् समुन्नतस्थानं प्रापयेत् तथा च गवेषकाणां वैदिकच्छात्राणां संस्कृतानुरागिणां च समाह्लादनकारकः भवेदिति मे द्रढीयान् विश्वासः।

अस्याङ्कस्य प्रकाशनाय सम्पादकाय वेदविभागाध्यक्षाय डॉ. शैलेन्द्रप्रसाद उनियालवर्याय अभिनन्दनपुरस्सरं भूरिशस्साधुवादाः वितीर्यन्ते। डॉ. शैलेन्द्रप्रसाद उनियालमहोदयेन प्रारब्धोऽयं वेदविभागः न केवलं देवभूमौ देवप्रयागे, अपितु निखिलेऽपि विश्वे देववाण्या वेदगङ्गां प्रसारयिष्यत्विति भगवन्तं श्रीरघुनाथं वेदमातरं च प्रार्थये।

इत्थम्

( परिसरः प्राचार्यः)

के. बी. सुब्बरायुडुः

# सम्पादकीयम्

लेखास्त्रयोदशश्चात्र चिन्ता धर्मादिकस्य च।
मन्ये धर्मस्य पत्न्यस्तु सेवार्थं हि समागताः॥

धर्मार्थकामेषु हि मोक्ष एव,
परः प्रधानः पुरुषैः समीरितः।
कलौ युगेऽस्मिन्नहि धर्ममोक्षौ,
समाद्रियेते तु जनैरसद्भिः॥2॥

धर्मान्वितं न्वर्थमनूद्वहेद्यः, अर्थैश्च कामं नहि धर्मरिक्तम्।
यः सेवते किन्न लभेत मोक्षं मुक्ताश्च बद्धान्परिमोचयन्तु॥3॥

तस्मान्मया धर्मयुतो विचारः, गोष्ठ्यां सुविद्वत्सु विचारितोऽत्र।
यतोहि राष्ट्रे सुचरित्रसिद्धिः, वृद्धिः समृद्धिश्च समागमिष्यति॥4॥

देवप्रयागाद्रघुनाथपीठतो वेदस्य मार्गः प्रसरेज्जनेषु।
वेदस्य गङ्गा च साङ्गा शुभाङ्गे तनोतु बुद्धिं विशदां सदा नः॥5॥

नराश्च नार्यः सुविचार्य कार्यं, कुर्वन्तु धर्मेण युतं सुधार्यम्।
आर्यास्सुमर्यादयया विधातुं स्थातुं प्रयातुञ्च भवन्तु सिद्धाः॥6॥

देवप्रयागे रघुनाथपीठे, वेदेन धर्मं च धर्मेण शर्म।
वेदस्य मार्गे सुसरेद्विभागः, त्यागेन नित्यं सफलत्वमेतु॥7॥

ऊर्ध्वबाहु-र्ब्रवीम्यद्य सर्वे शृण्वन्तु सज्जनाः।
धर्मादर्थश्च कामश्च मोक्षश्च प्रतिगृह्यताम्॥8॥

–डॉ. शैलेन्द्रप्रसादउनियालः

# विषयानुक्रमणिका


| | | |
|---|---|---|
| पुरोवाक् - | | *iii* |
| सम्पादकीयम् | | *v* |


## दैवीवाक्-काण्डः


| | | |
|---|---|---|
| 1. वैदिकस्वरास्तेषां प्रयोजनानि च | –प्रो. राजेश्वर मिश्रः | 1 |
| 2. शुक्लयजुर्वेदस्य वैज्ञानिकमध्ययनम् | –ओंकार यशवन्त सेलूकरः | 15 |
| 3. वैदिकसंस्कृतौ स्त्रीणामधिकाराः | –रामदेवः | 22 |
| 4. वैदिकनये पुरुषार्थप्राप्त्युपायाः | –डा. दे. दयानाथः | 27 |
| 5. यजुर्वेदीयस्वरसञ्चालन विधिः | –डॉ. शैलेन्द्र प्रसाद उनियाल | 31 |
| 6. वेदस्मृत्योरन्तस्सम्बन्धः | –डॉ. इतिश्री महापात्रः | 48 |
| 7. संकेतग्रहस्वरूपविमर्शः | –हरीशबहुगुणा | 54 |
| 8. न्याय-वैशेषिके मीमांसायाञ्च धर्मस्वरूपः | –ध्रुवकुमारोपाध्यायः | 61 |
| 9. वेदस्मृत्योः धर्मादिपुरूषार्थविचारः "भारतस्य प्रतिष्ठे द्वे संस्कृतिस्तथा" | –आचार्य- वाणी विलास डिमरी | 68 |
| 10. वेदेषु स्त्रीणामधिकारः | –डॉ. सन्दीपभट्टः | 73 |


## देवनागरी-काण्डः


| | | |
|---|---|---|
| 11. हिमालयी गङ्गा का वैशिष्ट्य (एक पर्यालोचन) | –डॉ. नारायण प्रसाद भट्टराई | 78 |
| 12. पुरुषार्थचतुष्टये धर्मस्वरूपम् | –विजय गुप्ता (शोधच्छात्र) | 86 |


## आंग्ल-काण्डः


| | | |
|---|---|---|
| 11. The concept of धर्म पद उपनिषद्-s | –Prof- Banamali Biswal | 92 |


✦✦✦

# वैदिकस्वरास्तेषां प्रयोजनानि च

**प्रो. राजेश्वर मिश्रः**
कु.वि., कुरूक्षेत्र

वैदिक साहित्यस्य प्रायः सर्वे ग्रन्थाः उदात्तादिस्वरैर्युक्ता आसन्निति संहिताब्राह्मणारण्यका-नामध्ययनेन अनुशीलनेन च स्पष्टतया परिलक्षितो भवति। संहिताः सर्वास्तु सस्वराः सन्ति, परन्तु सम्पूर्णं शतपथ-ब्राह्मणमथ च तैत्तिरीय-ब्राह्मणस्य, तैत्तिरीयारण्यकस्य, ऐतरेयारण्यकस्य बृहदारण्यकोपनिषदश्च कतिपयानि स्थलान्यपि उदात्तादिस्वैरङ्कितान्यु-पलभ्यन्ते। "शतपथवत्ताण्डिभाल्ल-विनां ब्राह्मणस्वरः" (3.15) इत्यनेन भषिकसूत्रेण ज्ञायते यत् पञ्चविंश-ब्राह्मणमन्ये च ब्राह्मणग्रन्थाः कदाचित् सस्वरा आसन्। आचार्यपाणिनेः **"विभाषा भाषायाम्"** (अष्टा. 6.1.181) सूत्रेणेत्थं प्रतिभाति यत्तेन वैदिकस्वरैः सह लौकिकशब्देष्वपि स्वराः निर्दिष्टाः, यत्र कुत्रापि च तेन भेदो दृष्टः तत्र सूत्रेणानेन स्वरभेदो निर्दिष्टः। इतोऽप्यधिकं तात्कलिकेषु 'गौप्त'दात्तादिषु शब्देषु स्वरभेदेन अर्थभेदमुपदेष्टुं तेन 'अण्' 'अञ्' इति प्रत्ययद्वयं विहितम्। विधानेनानेनासौ स्पष्टतया निर्दिशति यद् विपाशउत्तरे कूले ये कूपास्तेष्वञप्रत्ययो भवति दक्षिणतश्च कूपेष्वण्प्रत्ययो भवति[1]। अनेन लोके प्रयुक्तस्वराणां रक्षणाय पाणिनेः स्वीयासूक्ष्मेक्षिका दृष्टिः परिलक्ष्यते; या काशिकाकारेणापि सङ्केतिता[2]। सूक्ष्मदृशा समग्रभाषाणां स्वरविवेचनाथमाचार्य पाणिनिना न केवलं चित्-ञित्-नित्-कित्-तित्-पित् प्रत्ययेषु आगमेषु च चकाराद्यनुबन्धानां जटिला प्रक्रियाङ्गीकृता, प्रत्युत स्वराणां सम्यक्परिज्ञानाय चतुश्शतं सूत्राणि अपि पृथग्रूपेण रचितानि।

अतिप्राचीनकाले मनुस्मृति-निरुक्तादयो ग्रन्था अपि स्वरयुक्ताः आसन्निति प्राचीनहस्तलिखितैर्ग्रन्थैरवगम्यते। उदाहरणार्थमृक्श्लोकनाम्ना श्लोकद्वयं सस्वरं निरुक्ते

1. अष्टा. 4.2.78: उदवस्च विपाशः, इत्यस्य सूत्रस्य व्याख्या- विपाश उत्तरे कूले ये कूपास्तेष् वञ्। दत्ते निर्वृत्तो दात्तः कूपः (गुप्तेन निर्वृत्तो गौप्तः कूपः)। उदकं किम् दक्षिणतः कूपेष्वणेव (दात्तः, गौप्तः)।
2. तत्रैव, काशिका: महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य।

(3.4) उद्धृतम्[1]। अनयोरेकस्य पूर्वार्द्धमात्रं (अङ्गादङ्गात्सम्भवसि) तु शतपथब्राह्मणे (14.9.4.8) गोभिलगृह्यसूत्रे (2.8.2) चोपलभ्यते॥ अतः तस्य सस्वरं पाठोऽपेक्षितः, परन्त्वपरः श्लोकः (अविशेषेण पुत्राणाम्) कस्माच्चिद्धर्मशास्त्रग्रन्थादुद्धृत इति प्रतीयते। तस्य स्वरपाठेन तु प्रमाणितं भवति यत्तस्मिन् काले स्वराः सम्भाषणस्याभिन्नान्यङ्गन्यासन् **एतदतिरिच्यान्यत्रापि** निरुक्ते (14.6) लौकिकसंस्कृतेन निबद्धाः **"मृतश्चाहं पुनर्जातो"** इत्यादयः त्रयः श्लोकाः त्रयः श्लोकाः सस्वरं उद्धृताः सन्ति। [2]एतेषु प्रथमस्य पूर्वार्द्धो भावानुवादरूपेण अथ च द्वितीयस्य पूर्वार्द्धो यथावद्गर्भोपनिषदि (खण्ड 4) उद्धृतः द्वितीयः श्लोकस्य महाभारते विद्यते[3], परन्तु तत्र उभावपि स्वररहितौ वर्तेते वैजनाथ-काशीनाथराजवाड़ेमहोदयेन सम्पादिते निरुक्तेऽपि कतिपयेषु मन्त्रभिन्नांशेषु स्वरचिह्नान्युप-लभ्यन्ते॥ यथा "सर्चस्वा नः स्वस्तये" (ऋ. 1.1.9) मन्त्रांशस्य व्याख्या- "सेवस्यं नः स्वस्तये" स्वरयुक्ता प्रदत्ता[4]। प्रमाणान्येतान्यभिलक्ष्य केषाञ्चिद् विदुषां मते समग्रं निरुक्तं सस्वरमासिदिति ज्ञायते।

पाणिनिसमये वैदिकस्वराणां महत्त्वमासीदिति निःसंशयं सत्यम्; अतो वैदिकस्वरं प्रति पाणिनेरास्थां मनसि निधायानेके विद्वासोऽङ्गीकुर्वन्ति यदष्टाध्यायीग्रन्थोऽपि स्वराचिह्नाद् विहीनः संजातः। आचार्यपणिनेरष्टाध्यायीग्रन्थः एकश्रुतिस्वेरण पठित इति कैय्यटस्य महाभाष्यप्रदीपव्याख्यया ज्ञायते[5]। अस्य ग्रन्थस्य सर्वाणि सूत्राणि एकश्रुतिस्वरेण पठितानीति

---

1. निरु., 3.4:
   अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे।
   आत्मा वै पुत्रनामासि स जीव शरदः शतम्,
   अविशेषेण पुत्राणां दायो भवति धर्मतः।
   मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽ ब्रवीत्,
2. तदेव, 14.6:
   मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः।
   नाना योनिसहस्राणि मयोषितानि यानि वै,
   आहारा विविधा भुक्ताः पीता नानाविधा स्तनाः।
   मातरो विवधा दृष्टाः पितरः सुहृदस्तथा॥
   अवाङ्मुखः पीड्यमानो जन्तुश्चैव समन्वितः।
   साङ्ख्यं योगं समभ्यसेत पुरूषं वा पञ्चविंयकम्;
3. महाभारतम्ए अश्वमेधपर्व, 16.32.
4. निरु., 3.21 (आनन्दाश्रम् मुद्रणालयः, पूना, 1621, पृ. 280)।
5. प्रदीप महाभाष्यम् 1.1.1 एक श्रुत्या हि सूत्राणां पाठात्सर्वेषामुदात्तादीनामुपदेशः कर्तव्यः इत्याह...।

महाभाष्यस्याध्यायनेनापि सस्फुटं परिलक्ष्यते[1]। केषाञ्चित् प्राचीनविदुषां मतावलम्बिना कैयटेन तु अष्टाध्यायीग्रन्थे एकश्रुतिस्वर एवानुमतम्[2]। कानिचित श्रौतसूत्राणि अपि मतमेतद् दृढीकुर्वन्ति। तदानीन्तने काले तानस्वरस्यैव (एक श्रुतेरेव) प्रामुख्यमासीदिति कात्ययनश्रौतसूत्रेण ज्ञायते[3]। आश्वलायनश्रौतसूत्रेऽपि ऋङ्मन्त्रपाठे एकश्रुतिस्वरो निर्दिष्टः, तस्य लक्षणमपि तत्र प्रदत्तम्[4]। साक्ष्यैरेभिः स्फुटं प्रतिभाति यत् श्रौतसूत्राणां प्रवचनकालाद् (3000 विक्रम. पूर्वम्) बहु पूर्वमेव मन्त्रोच्चारणे केवलमेकश्रुतिस्वर एवावशिष्ट आसीत्। परन्तु प्रमाणैरभिस्तु सत्यमेतद् यत् प्राचीन वैदिकवाङ्मयस्याधिकं साहित्यं सस्वरमासीत्।

**स्वरार्थः तस्य भेदश्च-**

महाभाष्यकारस्य मते ये कस्यापि सहायतां विना स्वयमेव उच्चार्यन्ते, प्रकाश्यन्ते ते स्वराः कथ्यन्ते। एतेषामुच्चारणे कस्याप्यन्यवर्णस्यापेक्षा नानुभूयते, परन्तु स्वरं विना व्यञ्जनवर्णाः नोच्चार्यन्ते[5]। एते स्वरवर्णाः सन्ति- अ, आ, इ, ई, उ, ऊ, ऋ ॠ ए, ऐ, ओ, औ इति। पाणिनिना एते 'अच्' इति प्रत्याहारे परिगणिताः। ऋक्प्रतिशाख्ये एतेषाम् 'अक्षर' इति संज्ञा कृता विद्यते। एते स्वरवर्णा विविधैः प्रकारैः उच्चार्यन्ते। एकस्यैव स्वरवर्णस्योच्चारणं कदाचिद् वर्णानामुच्चाणस्थानस्योच्चभागे, कदाचिन्निम्नभागे, कदाचिच्च मध्यमभागे कर्तुंशक्यते। एते उच्च-नीच-मध्यमस्वरोच्चारणविधय एव स्वरधर्मा निगद्यन्ते। धर्म-धर्मि-सबन्धात् स्वरधर्मा एते स्वरा इत्युच्यन्ते; यतो ह्येते स्वरवर्णेषु अर्थादक्षरेषु आश्रिताः भवन्ति[6]; अतः स्वरधर्माणां स्वरत्वं लाक्षणिकं विद्यते। वैदिकवाङ्मयस्याधिकं भागं गेयात्मकमस्ति। तथा भूते सति तेषु प्रयुक्तस्याच-धर्मरूपस्वरस्य मुख्यतया त्रयो भेदाः स्वीकृताः। ते सन्ति-उदात्तानुदात्तस्वरिताश्चेति। एते त्रयः स्वराः त्रैस्वर्यरूपेण गृह्यन्ते[7]। वेदमन्त्राणामुच्चारणे त्रैस्वर्याणामेतेषां विधानमुपलभ्यते। प्रायः सर्वासु शिक्षासु,

---

1. महाभाष्यम् 6.4.172: एकश्रुतिनिर्देशात्सिद्धम्।
2. तदेव, 1.1.1 पर प्रदीपोद्योत-अन्ये त्वाहुः 'एकश्रुत्या सूत्राणि पठन्त, इति।'
3. कात्या. श्रौत., 1.818: तानो वा नित्यत्वात् (कर्कभाष्यमप्यत्र दृष्टव्यम्)।
4. आश्वला. श्रौत., 1.2.: ता एक श्रुतिः संततमनुब्रूयम्त्;- उदात्तानुदात्तस्वरितानां परः सन्निकर्ष ऐक श्रुत्यम् (अत्र नारायणकृत वृत्तिरपि द्रष्टव्या)।
5. महाभाष्यम्। 1.2.29: स्वयं राजन्त इति स्वराः, अन्वग्भवति व्यञ्जनम्।
6. मृक्प्रति., 3.2: अक्षराश्रयाः।
7. वर्ण. र.प्रदी.शि., 86:
   स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च।
   स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम्;

प्रतिशाख्येषु चोदात्तदयः त्रयः त्रयः स्वराः स्वीकृताः[1]। केचन आचार्याः उदात्तानुदात्त-स्वरितप्रचयभेदेन चत्वारः प्रमुखाः स्वराः स्वीकुर्वन्ति। तैत्तिरीयप्रतिशाख्ये[2], अपिच पाणिनीयशिक्षायां चत्वारः प्रमखाः स्वराः स्वीकृताः। पाणिनीयशिक्षायां तु संस्थानं तेषां विवेचनमुपलभ्यते। तदनुसारमनुदात्तः हृदि, उदात्तो मूर्धनि, स्वरितः कर्णमूले, प्रचयश्च मुखे ज्ञेयाः भवन्ति[3]। नारदीयशिक्षायां निघातस्वरः पञ्चमस्वररूपेण स्वीकृतः[4]। एवमेव महाभाष्ये वाजसनेयिप्रतिशाख्ये चोदात्त-उदात्तर-अनुदात्त-अनुदात्ततर-स्वरित-स्वरित-स्थोदात्त-एक श्रुतिरूपेण सप्त-स्वराः विवेचिताः[5]। वाजसेनयिप्रातिशाख्येऽन्यत्र जप-साम-न्यूङ्खव्यतिरिक्तेषु मन्त्रेष्वेकः तानस्वरो विहितः[6], यतो हि यज्ञकर्मणि एकस्यैवस्वरस्या-वश्यकता भवति। इत्थं वैदिकस्वराणां संख्याविषये विदुषां वैमत्यं दृश्यते, परन्तु उदात्तानुदात्त-स्वरितरूपत्रिषु स्वरेषु एवं प्रायः सर्वे वैदिकस्वराः समाविष्टाः भवन्ति। उदात्ततरस्यान्तर्भूताः उदात्ते, अनुदात्ततरस्य चानुदात्ते भवति। एवमेव प्रचयः तदेव, 1.30: एकम्, (अत्र उव्वटकृतो व्याख्यातानलक्षणमेकं स्वरमाहुर्यज्ञकर्मणि)। एकश्रुतिः वा अनुदात्तस्य प्रतिरूप एवं; अतोऽस्यान्तर्भवोऽनुदात्तेभवति, यतो हि स्वरितादनन्तरं विद्यमानोऽनुदात्तः प्रचयो भवति। वस्तुतस्तु स्वरस्य उच्च-निम्न-मध्यमरूपोच्चारणदृशा उदात्तः, अनुदात्तः स्वरितश्चेति त्रय एव स्वरा भवन्ति। अन्ये सर्वे स्वराः उच्चारणलक्षणानु-सारमेतेषामवान्तररूपाणि वर्तन्ते।

---

1. पा.शि., 11: उदात्तानुदात्तश्च स्वरितश्च स्वरास्त्रयः।
   या.शि., 1: उदात्तानुदात्तश्च स्वरितश्च तथैव तत्-1
   ना.शि., 8.1: उदात्तश्चानुदात्तश्च तृतीयः स्वरितः स्वरः।
   ऋ.प्रा., 3.1: उदात्तानुदात्तश्च स्वरितश्च त्रयः स्वराः।
2. तै. प्रा., 23.20: तच्चतुर्थमभित्युक्तम्।
3. पा. शि. 48:
   अनुदात्तो हृदिज्ञेयो मूर्धन्युदात्त उदाहृतः।
   स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः;
4. नार.शि., 7.9:
   उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा।
   निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चमः;
5. महाभाष्यम 1.2.33: सप्तस्वराभवन्ति। उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते य उदात्तः सोऽन्येन विशिष्टः, एकश्रतिः सप्तमः। वाज., प्रा., 1.127.
6. तदेव, 1.39: समाजपन्यूङ्खवर्जम्।

## वैदिकस्वराणां लक्षणमुच्चारणविधिश्च

उदात्तः उच्चस्वरः स्वीक्रियते। उच्चैरादीयते इति उदात्तः[1], अर्थादुच्चारणस्थान-स्योर्ध्वभागेषु येषामच्वर्णानामुच्चारणं भवति, तेषामुदात्तसंज्ञा स्वीकृता[2]। तैत्तिरीयप्रातिशाख्ये गात्रस्य आयामः (दीर्घता), स्वरस्य दारुण्यमथ च कण्ठविवरस्य संवृतत्वमुदात्तस्वरस्योच्चा-रणकारणानि निर्दिष्टानि[3]। ऋक् प्रातिशाख्येऽपि गात्रस्यायामेनोदात्तस्वरस्योच्चारणं विहितम्[4]। अतः निश्चयेन वक्तुं शक्यते यत् ताल्वादिस्थानस्योर्ध्वभागेभ्यः उदात्तस्वरः उच्चार्यते। एषः स्वरे नाम्ना सर्वोच्चस्वरो गण्यते, परन्तु ऋक्प्रतिशाख्ये उदात्तः मध्यमस्वरः स्वीकृतः, यतो हि स्वरितस्य यः पूर्वभागः उदात्तोभवति, सः उच्चारणे उदात्ततरो भवति। वस्तुतः उदात्तस्वरः उपरि गम्यमान इव दृश्यते। प्राचीनकालेऽस्योच्चारणं सर्वोच्चध्वनिरूपेण क्रियते स्म, परन्तु साम्प्रतं मध्यमस्वररूपेणास्योच्चारणं क्रियते। मध्यमस्वरकारणादसौ स्वरः त्रिषु स्वरेषु प्रमुखो वर्तते। पदार्थनिर्धारणेऽसौ स्वरः सहायको भवति।

'नीचैरादीयते इत्यनुदात्तः' अर्थादुच्चारणस्थानस्य निम्नभागे उच्चारितः स्वरः अनुदात्तः कथ्यते। एषः स्वरो नीचस्वरः स्वीक्रियते[5]। वस्तुतः ताल्वादिषुसभागेषु स्थानेषु निम्नभागे निष्पन्नोऽच्वर्णः अनुदात्तसंज्ञको भवति[6]। ऋक्प्रातिशाख्येऽस्योच्चारणं विश्रम्भेणोपदिष्टम्।[7] वायुनिमित्तं शरीरावययानामधोगमनमेव विश्रम्भ उच्यते[8]। अतो गात्राणां मार्दवेनाधोगमनेन यः स्वरो निष्पद्यते सोऽनुदात्तसंज्ञको भवति[9]। तैत्तिरीयप्रतिशाख्यकारस्यमते गात्रस्य मार्दवं, स्वरस्य मृदुता, कण्ठस्य विकासः एवानुदात्तस्योच्चारणे सहायकानि प्रयत्नानि-

---

1. अष्टा., 1, 2, 29: उच्चैरुदात्तः।
2. तदेव, तत्रैव, भट्टोजिदीक्षितस्य व्याख्या ताल्वदिषु सभागेषु स्थनेषु पूर्ध्वभागे निष्पन्नोऽजनदात्तसंज्ञकः स्यात्।
3. तैत्ति. प्रा., 22.9: आयामो दारुण्यमणुता खस्येत्युच्चैः कराणि शब्दस्य। तुल. महाभाष्यम् 1.2.9; वाज. प्रा. 1.108 इत्यत्र उव्वट व्याख्या आयामोर्ध्वगमनेन गात्राणां यः स्वरो निष्पद्यते स उदात्तसंज्ञो भवति।
4. ऋक् प्रा., 3.9: आयामविश्रम्भाक्षेपैस्त उच्यन्ते।
5. अष्टा. 1,2, 30: नीच्चैरनुदात्तः।
6. तदेव, तत्रैव, भट्टोजिदीक्षितस्य व्याख्या ताल्वदिषु सभागेषु स्थानेषु निम्नभागे निष्पन्नोऽजनुदात्त- संज्ञः स्यात्।
7. ऋ. प्रा., 3.1: आयामविश्रम्भाक्षेपैस्त उच्यन्ते।
8. तदेव, तत्रैव, उव्वटव्याख्या- विश्रम्भो नामाधोगमनं गात्राणां वायुनिमित्तम्। <u>न</u>ः। <u>नौ</u>।
9. वाज. प्रा., 1.109 पर उव्वट व्याख्या-नीचैर्मार्दवेनाधोगमनेन गात्राणां यः स्वरो निष्पद्यते सोऽनुदात्तसंज्ञो भवति, यथा- आर्षेय।

भवन्ति[1]। आपिशलिशिक्षानुसारमपियदा प्रयत्नो मन्दो भवति, तदा गात्रस्य शैथिल्येन, कण्ठविलस्य विकासेन, वायोर्मन्दगतित्वाच्चस्वरस्य स्निग्धता भवति, प्रयत्नेनानेनानु-दात्तमुच्चार्यते[2]। यद्यपि वर्णोच्चारणस्थानस्य निम्नभागे स्वरस्योच्चारणं कठिनं वर्तते, यतो ह्यस्योल्लेखः कुत्राऽपि न प्राप्यते, परन्तु कैय्यटस्य मतेऽत्यधिकाभ्यासेनोच्चारणपार्थक्यमवबोद्धुं शक्यते।[3]

सामान्यतया प्रायः सर्वे वैयाकरणाः प्रतिशाख्यकाराश्चोदात्तादव्यवहितपरोऽथवा व्यञ्जनव्यवहितपरोऽनुदात्तः 'स्वरित' इति स्वीकुर्वन्ति[4]। अनेनेत्थं प्रतिभाति यदुदात्रादनन्तर-मागतोऽनुदात्तः स्वरितो भवति तथाच द्वयोः (उदात्तानुदात्तयोः) समाहारेण स्वरितो भवति[5]। प्रकारान्तरेणैवं वक्तुं शक्यते यदुदात्तानुदात्तश्चोभौ मिलित्वा स्वरितरूपे परिवर्तेते। यथा त्रपुताम्रयोः संयोगेनापरस्य धातोः कांस्यस्योपत्तिर्यथा च गुडदध्नोरेकी भावेन मार्जिकस्योत्पत्तिः भवति तथैवोदात्तानुदात्तयोः समाहारेण स्वरित स्योत्पत्तिर्भवतीत्या चार्यः उव्वटः स्वीकरोति[6]। विषयेऽस्मिन् सन्देहो जायते, यदुदम्तानुदात्तयोः द्वयोर्वर्णयोः समाहारः स्वरितो भवति अथवात्रोदात्तानुदात्तरूपवर्णधर्मयोः समाहारो भवति? अत्रावधेयं तथ्यमिदमस्ति यदुदात्तत्वानु-दात्तत्ववर्ण धर्मयोः समाहारो यस्मिन्नच् वर्णे भवति, सः स्वरितसंज्ञको भवति, यथा स्वरसिद्धान्तचन्द्रिकाकारः श्रीनिवासयज्वा सङ्केतयति।[7] अतः समाहारेण समावेशन वा

---

1. तैत्ति. प्रा., 22.10: अन्ववसर्गो मार्दवमुरूता खस्येति नीचैः कराणि। तत्रैव, द्र. त्रिभाष्य रत्न व्याख्या- अन्ववसर्गो गात्राणां विस्तृता मार्दवं स्वरस्य स्निग्धता। खस्य उरूता, कण्ठस्य स्थूलता। इत्येतानि साधनानि शब्दस्य नीचैः करणानि, शब्दं नीचमनुदात्तं कुर्वन्तीत्यर्थः।
2. आपिश. शि., 8.21: यदा तु मन्दः प्रयत्नोभवति, तदा गात्रस्य स्रंसनं कर्णविलस्य महत्त्वं स्वरस्य च वायेर्मन्दगातित्वात् स्निग्धता भवति, त मनुदात्तं प्रचक्षते।
3. द्र. प्रदीपः महाभाष्यम् 1.2.29
4. अष्टा., 8.4.66: उदात्तादनुदात्तस्य स्वरितः।
   ऋक्प्राति., 3.3.: एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः।
   तैत्ति. प्रा. 14.29: उदात्तात्परोऽनुदात्तः स्वरितम्।
   वाज.प्रा., 4.137: उदात्तच्चानुदात्तं।
5. अष्टा., 1,2,31: समाहारः स्वरितः, तु ल., तैत्ति. प्राप. 1.40।
6. वाज. प्रा., 1, 126: परि उव्वटव्याख्या- यथात्र पुताम्रयोः संयोगे धात्वन्तरस्य कांस्यस्योत्पत्तिर्यथा च गुडदध्नोरेकीभावे मार्जिकोत्पत्तिरेवमुदात्तानुदात्तसंयोगे स्वरितोत्पत्तिः। तुल., ऋक् प्रा., 3.3 उपारि उव्वटभाष्यमपि द्रष्टव्यम्।
7. स्वरसिद्धा, संज्ञाप्रकरणम् सूत्रम् 3: उदात्तत्वानुदात्तत्वलक्षणवर्णधर्मसमाहारवान् स्वरितसंज्ञ इत्यर्थः। तुल. बालमनोरमा सिद्धा. कौ. 1.2.21- ततश्च उदात्तः अनुदात्तश्च अच् समाह्रियमाणः स्वरित इत्यर्थः प्रतीयते।

द्वयोः धर्मयोरेकधर्मे विपरिणमनं भवति। परिणामतः उदात्तानुदात्तयोः सम्मिश्रणेन तद्भिन्नः स्वरितस्वरः निष्पद्यते। अनने प्रकारेण स्वरितस्य निष्पत्तिः मूलतः द्विविधा भवति, तद्यथा- (1) उदात्तादनन्तरं यदि अव्यवहितोऽनुदात्तः आयाति, तदा उभयोस्थाने स्वरितो भवति। सः स्वरितः क्षेप्र-अभिनिहित-प्रश्लिष्टसन्धिभेदेन त्रिविधः उच्यते,

**यथा-**

हि+अग्ने > त ह्यग्ने, नु+इन्द्रः > न्विन्द्रः (क्षैप्रस्वरितः)।

ते+अवर्धन्त > तेऽवर्धन्त (अभिनिहितस्वरितः)।

स्रुचि+इव > स्रुचीव (प्रश्लिष्टस्वरितः)।

(2) उदात्तादनन्तरं यदि व्यवहितोऽनुदात्तः आयाति, तदा सोऽनुदात्तः उदात्तप्रभावेण स्वरितोभवति। सःस्वरितः तैरोव्यञ्ज नः, तैरोविरामः, पादवृत्तः, वैवृत्तोवा, प्रातिहतः इत्येतैरभिधानैरभिधीयते।

उदात्तानुदात्तयोः ध्वनिसम्मिश्रणेन यः ध्वनिरुत्पद्यते स स्वरितोच्चारणस्य ध्वनिर्भवति। अस्योच्चारणमाक्षेपैः क्रियते[1]। उव्वटमतानुसारं वायुनिःसारणार्थं गात्राणं तिर्यग्गमनमाक्षेण उच्यते।[2] अतः यदा वर्णोच्चारणार्थमूर्ध्वप्रयत्नः न क्रियते, न च निम्नप्रयत्नः क्रियते प्रत्युत उभयोः समाहारेण त्रिर्यग्रूपेण मिश्रितप्रयत्नः क्रियते, तदा स्वरितस्योच्चारणं भवति।

### स्वरितस्वरे उदात्तानुदात्तयोरंशः

उदात्तानुदात्तयोः समाहारेण निष्पन्ने स्वरितस्वरे कियानंशः उदात्तः कियानंशश्चानुदात्तो भवति, इत्यस्मिनन्विषये प्रतिशाख्य-शिक्षा-व्याकरणादिषु ग्रन्थेषु विशदेन विवेचितम्। तदनुसारं स्वरितस्वरे प्रारम्भिकी अर्धमात्रा उदात्तधर्मा भवति शेषश्चांशोऽनुदात्तधर्मा। तद्वत् ह्रस्वस्वरितस्य पूर्वाधः उदात्तः, उत्तरार्धश्चानुदात्तो भवति[3]। एवमेव दीर्घस्वरितस्य पूर्वार्धमात्रा

---

1. ऋक् प्रा., 3.1:
   उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः।
   आयामविश्रम्भाक्षेपैस्त उच्यन्ते॥
2. तत्रैव, उव्वटभाष्यम्- आक्षेपो नाम निर्यग्गमनं गात्राणां वायुनिमित्तम्; तुल., चतुरध्यायिका, 1.116: आक्षिप्तं स्वरितम्।
3. अष्टा., 12.32: तस्यादित उदात्तमर्धह्रस्वम्;
   ऋक्. प्रा., 3.4: तस्योदात्ततरोदात्तादर्धमात्रार्धमेव वा।
   चतुरध्यायिका, 1.17: स्वरितस्यादितो मात्रार्धमुदात्तम्।
   नार.शि., 2.26: मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम्।

उदात्तधर्माशेषश्चांगः सार्धका मात्रानुदात्तधर्मा भवति (1/1/2)। तथैव च प्लुतस्वरितस्य पूर्वार्धमात्रा उदात्तधर्मा शेषश्च सार्धमात्राद्वयमनुदात्तयुक्तं भवति (1/1/2)।

वस्तुतस्तु तथ्यमिदमत्रावधेयं वर्तते यत्, स्वरितस्य वर्गद्वयं विद्यते- (1) स्वतन्त्रस्वरितः (2) सामान्यस्वरितश्च। उभौ पृथक्-पृथक् स्वरौ विद्येते, यतो हि 'समाहारः स्वरितः' इत्येतत् लक्षणं स्वतन्त्रस्वरितस्य वर्तते न तु सामान्यस्वररितस्याश्रितस्वरितस्य वा। वस्तुतः सामान्यस्वरितः जात्या अनुदात्तो भवति। अत्रोदात्तानुदात्तयोः समाहारो न भवति। यथा आचार्यशौनकेन सङ्केतितं यदुदात्तपूर्वस्वरितः पदेऽनुदात्तोऽवगच्छेदिति।[1] उभयोर्मध्ये (स्वतन्त्रस्वरितः) उदात्तानुदात्तयोः समाहारेण निष्पद्यतेऽपरश्च (आश्रितस्वरः) उदात्तात्परोऽनुदात्तः स्वरित उच्यते। स्वतन्त्रस्वरितो द्विविधो भवति (1) सन्ति ध्वजोऽसन्धिजश्चेति। असन्धिजस्वरितोऽयं, न तु उदात्तात्परस्यानुदात्तस्य उदात्तप्रभावम् परिवर्तितस्वरितरूपोऽस्ति। ऋक् प्रतिशाख्यानुसारमेष स्वरः सर्वदायकारस्य वकारस्योपरि निष्पद्यमानोऽनुदात्तपूर्वो नानुदात्तपूर्वो वा स्वरितो जात्यस्वरितः कथ्यते।[2] तैत्तिरीयप्रतिशाख्येऽसौ नित्यस्वरितः उच्चते[3]। जात्यस्वरितस्य निरूपणाय महर्षिपाणिनिना स्वतन्त्रसूत्रमेकं प्रदत्तं- **'तित्स्वरितमिति'** (अष्टा. 6.1.185)। तदनुसारं 'त्' अनुबन्धयुक्त प्रत्ययसंयोगेन निष्पन्नः शब्दः जात्यस्वरितयुक्तो भवति, यथा- कन्+यत=कन्या इति।

प्रतिशाख्येषु शिक्षाग्रन्थेषु च स्वरितस्य सप्त अष्टौवा भेदाः स्वीकृताः। याज्ञवल्क्यशिक्षायामस्य- जात्य-अभिनिहित-क्षैप्र-प्रश्लिष्ट-तैरोव्यञ्जन-तैरोविराम-पादवृत्त-ताथाभाव्याश्चेति अष्टभेदा उल्लिखिताः[4]। परन्तु नारदीयशिक्षायां ताथाभाव्यस्वरितं विहायान्ये सप्तस्वरिताः वर्णिताः।[5] स्वरितस्वरस्य भेद-प्रभेदाः निम्नतालिकया सम्यगवगन्तुं-

1. ऋक्. प्रा., 3.7: उदात्तपूर्वं स्वरितमनुदात्तंपदेऽक्षरम्।
2. ऋक्. प्रा., 3.8: अतोऽन्यत्वरितं स्वारं जात्यमाचक्षते पदे।
3. तैत्ति. प्रा., 20.2: सयकारवकारं त्वक्षरं यत्र स्वर्यते स्थिते पदेऽनुदात्तपूर्वेऽपूर्वेवा नित्य इत्येव जानीयात्।
4. याज्ञ.शि., 75, 76:
   अष्टौ स्वरान्प्रवक्ष्यामि तेषामेवतु लक्षणम्।
   जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथाऽपरः॥
   तैरोव्यञ्जनसंज्ञश्च तथा तैरोविरामकः।
   पादवृत्तो भवेत्तद्वत्ताथााभाव्य इति स्वराः॥
5. नार. शि., 1.8.10:
   जात्यः क्षैप्रोऽभिनिहितस्तैरोव्यञ्जन एव च।
   तैरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः;
   द्रष्टव्यम्, ऋक् प्रा., 3.7, 3.8, 3.18॥ तैत्ति. प्रा. 20.1.8।

शक्यन्ते[1]

स्वरित:

स्वतन्त्रस्वरित: सामान्यस्वरित:

सन्धिज: असन्धिज: पादवृत्त: तैरोविराम: तैरोव्यञ्जन: ताथाभाव्य: प्रतिहत:

प्रश्लिष्ट: क्षैप्र: अभिनिहित:

स्वरितेषु मुख्यस्वरितस्तु जात्यस्वरित एव, यतो हि एष. प्रकृत्या स्वरिती भवति। अन्येषां स्वरितानां पृथङ्नामकरणस्य कारणं विभिन्ना वैदिकसन्धय: सन्ति।

वैदिकस्वराणां विवेचनप्रसङ्गेऽत्र कम्पस्वरस्य, अथ च प्रचयस्य एकश्रुतेर्वा सामान्य-परिचयोऽपेक्ष्यते। कम्पस्वर: प्रचयस्वरो वा स्वतन्त्रस्वरो नास्ति, प्रत्युत विशेषपरिस्थितौ स्वरितस्य विशिष्टमुच्चारणमेव कम्पस्वरितनाम्नाभिधीयते। स्वतन्त्रस्वरितात्परमुदात्ते स्वतन्त्रस्वरिते वा प्राप्ते सति स्वरितस्योत्तरवर्ती अनुदात्तांश: एकश्रुतिर्न भूत्वा अणुमात्राकालोऽयम् य: निहितो भवति। अस्योच्चारणे कम्पनं जायते। जात्य-क्षैप्र-प्रश्लिष्टाभिनिहित-स्वराणमुत्तरवर्ति-अनुदात्तांयशस्योच्चारणे कम्पनं भवति, यदि तत्पश्चादुदात्त: स्वतन्त्रस्वरितो वा विद्यमानो भवति[2]। वस्तुतस्तु स्वरोऽयं अनुदात्तस्यावस्थाविशेष एव, यस्योच्चारणे कम्पनं भवति। असौ नीलस्वरोऽपि कथ्यते। एवमेव प्रचयस्वरोऽपि कोऽपि स्वतन्त्रस्वरोनास्ति, अपि तु मूलत: अनुदात्त एव भवति। यदा स्वरितस्वरात्परमेकमनेकं वानुदात्तं भवति, तदा पूर्ववर्त्तिन: स्वरितस्वरस्य प्रभावेना सौ स्वर: अनुदात्तवत् नोच्चार्य उदात्तवदुच्चार्यते; अत एष एव प्रचय: प्रचित:, निचित:, उदात्तमय इति कथ्यते।[3] अस् योच्चारणे आचार्येषु वैमत्यं विद्यते। तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणमिति भाष्यानुसारं उदात्तानुदात्तयो: करणरहित: प्रचयो भवति तथा चोदम्त्तानुदात्तयो: समाहारेणोतपन्न: स्वरित उच्यते।[4]

---

1. स्वरितस्वरस्य भेद-प्रभेदानां परिचयार्थं प्रातिशाख्यग्रन्था: शिक्षाग्रन्थाश्च द्रष्टव्या:। कलेवरवृद्धिभयादत्र नोल्लिखितम्।
2. ऋक्. प्रा., 3.34:
   जात्योऽभिनिहितश्चैव क्षैप्र: प्रश्लिष्ट एव च।
   एते स्वारा: प्रकम्पन्ते यत्रोच्चस्वरितोदया:;
3. प्रातिशा. प्र. शिक्षा (शिक्षासंग्रह), पृ. 216- स्वरितात्परमनुदात्तमेकमनेकं वाक्षरमुदात्तवत्, एकश्रुत्या प्रचय: प्रचित: प्रचो निचित उदात्तमय इति वैदिकैर्व्यवह्रियते।
   तुल.- ऋक् प्रा. 3.19: स्वरितादनुदात्तानां परेषां प्रचय: स्वर:। ॥ अष्टा., 1.2.39: स्वरितात्संहितायामनुदात्तानाम्।
4. वैदिकाभरणम्, 23.19: उभयकरणरहित: प्रचय:, उभयकरणसमावेशजन्य: स्वरित इति।

काशिकाकारस्य मते प्रचयः उदात्तादनांस्वराणामभेदरूपं भवति।[1] आश्वलायनश्रौतसूत्रानुसारमुदात्तानुदात्तस्वरितानामतिशयसन्निकर्ष ऐकश्रुत्यमुच्यते।[2] शौनकोऽस्योच्चारणमुदात्तवत् स्वीकरोति।[3] प्रदीपकारेण कैय्यटेनापि क्षीरोदकवदुदात्तानुदात्तयोरभेदोच्चारामेव एकश्रुतिरित्यङ्गीकृतम्।[4] वाजसनेयि प्रतिशाख्यकारोऽपि प्रचये उदात्तधर्मस्याधिक्यं मन्यते।[5] अतोऽस्योदात्तश्रुतिरिति प्रायः सर्वे आचार्याः स्वीकुर्वन्ति।

## स्वराणामुपादेयता प्रयोजनानि वा

स्वरा एव वैदिकभाषायाः वैशिष्ट्यं, यतो ह्युदात्तानुदात्तस्वरितरूपेणास्यां भाषायां विशेषाभिप्रायसम्बद्धो ध्वनिः नियन्त्रितोऽस्ति। वैदिकस्वरेष्वेतेषु स्वराघातो बलाघातश्चोभावपि विद्यते। सस्वरं मन्त्रोच्चारणसमये स्वराणामारोहावरोहनियमानां पालनमावश्यकं भवति; अतः संहितापाठे विहिताः स्वरनियमाः स्वराघातस्यैव वैशिष्ट्यमुल्लिखन्ति। संहितायामनुदात्तादनन्तरमुदात्तः, उदात्तादनन्तरं स्वरितः स्वराघातवशादेव भवन्ति। एवमेवोदात्तानुदात्तजात्यजात्यस्वरिताः पदार्थस्य नियामकाः सन्ति; अतो बलाघातेन पदस्वरविमर्शः क्रियते। इत्थं स्वराघातः मन्त्रोच्चारणे सहायको भवति, बलाघातश्च पदार्थनिर्णये उपादेयो भवति। एवं वेदपाठपरिरक्षणार्थं वेदमन्त्रार्थचिन्तने च स्वराणामुपयोगो विधीयते।

वेदाध्यने वैदिकस्वराणां महन्महत्त्वं वर्तते, यतो हि मन्त्राणां सस्वरं शुद्धोच्चारणे च, तेषामर्थनिर्णयेऽपि स्वरज्ञानमावश्यकमिति। वेदार्थावबोधनाय शुद्धमन्त्रोच्चारणाय आचार्यैः शिक्षावेदाङ्गं विरचितम्। प्रातिशाख्यशिक्षादिग्रन्थेषूदात्तादीनां स्वराणां सविस्तरं विवेचनमुपलभ्यते। पाणिनीयशिक्षानुसारं स्वरदृशा वर्णदृशाचाशुद्धमन्त्रोचारणान्न केवलं मन्त्रस्याभिप्रेतोऽर्थो न प्रतीयते, प्रत्युत तेनानर्थोऽप्युपजायते। विशेषेण तत्र प्रतिपादिता इन्द्रवृत्रकथाऽत्रानुसन्धेया। श्रूयते यत् पुरा स्वकीयपुत्रस्य वृत्रस्य शक्तिसम्बर्द्धनाय त्वष्टासुरेण सम्पादिते यज्ञे ऋत्विग्भिः "इन्द्रशत्रु वर्धस्व" इत्यस्मिन् मन्त्रे 'इन्द्र शत्रु' पदस्याशुद्धोच्चारणं कृतं, येन

---

1. काशिका, 1.2.33: स्वराणामुदात्तादीनामविभागो भेदतिरोधानमेकश्रुतिः।
2. आश्व. श्रौत., 1.2.9: उदात्तनुदात्तस्वरितानां परः सन्निकर्ष ऐकश्रुत्यम्
3. ऋक् प्रा., 3.19:
   स्वरितादनुदात्तानां परेषां प्रचयः स्वरः।
   उदात्तश्रुतितां यान्त्येकं द्वे वा बहूनि वाः;
4. कैय्यट॥ प्रदीप: 1.2.33:
   क्षीरोदकवदुदात्तानुदात्तयोर्योगे स्वरितः स्वार उच्यते।
   ऐक्यं तत्प्रचयः प्रोक्तः सन्धिरेष मिथोऽदभुतः;
5. वाज. प्राति., 4.139. स्वरितात्परमनुदात्तामुदात्तमयम्।

यजमानं वृत्रं प्रति तदनिष्टकारकमभवत्।[1] अत्र इन्द्रशत्रुपदं 'इन्द्रस्य शत्रुः घातक' इति विवक्षितेऽर्थे तत्पुरुषसमासे 'समासस्य' (6.1.223) इति सूत्रेण तत्पुरुषत्वादन्तोदात्त-मुच्चारणीयमासीत् परं तत्स्थाने यज्ञकर्मणि बहुब्रीहिसमासे आद्युदात्तमुच्चारितं, तथा सति 'बहुब्रीहौ प्रकृत्या पूर्वपदम्' (अ. 6.2.1) इति सूत्रेण "इन्द्रशत्रुः शातयिता विनाशयिता यस्य स" इत्यर्थो जातः। स्वरदोषाच्चानिष्टं जातम्। एवमेव सर्वत्र भाषासु नानार्थकाः शब्दाः हुपलभ्यन्ते। ते च विना तात्पर्यनिर्णयार्थ विशेषं निश्चेतुमसमर्थाः। प्रकरणादिभिरूपायैः तात्पर्यावधारणं सम्पाद्यम्, परन्तु ते कदाचिन्न निर्णायका भवेयुः। स्वरस्तु शब्दगतोऽन्तरङ्गः तन्निर्णायको भवति। अतो वेदार्थनिर्धारणाय स्वरज्ञानमुपादेयमिति बहुभिः आचार्यैः स्वीकृतम्। ऋग्वेदभाष्यकारस्य वेङ्कटमाधवस्य मते स्वरज्ञानेन मन्त्रार्थाः तथैव स्फुटाः सन्देहरहिताश्च भवन्ति, यथान्धकारे दीपिकाभिः सह गच्छन् पुरुषः स्फुटप्रकाशात् क्वचिन्न स्खलति।[2] मीमांसासूत्रभाष्ये शबरस्वामिनाऽपि स्वीकृतं तद्यन्मन्त्रेषूदात्तादीनां त्रैस्वर्याणामुच्चारणव्यवस्था मन्त्राणामर्थबोधनाय एव कृता विद्यते।[3] यदि समान्यतया शब्दार्थनिर्धारणं न भवितुमर्हति, तदा उदात्तादयः स्वरा अर्थज्ञापका भवन्ति भर्तृ हरिरपि अङ्गीकरोति।[4] स्वामिदयानन्दोऽपि वेदार्थावबोधे स्वराणामुपादेयत्वं स्वीकृत्य स्वकीये 'सौवरः' इत्यास्मिन् ग्रन्थे स्वरसूत्राणां व्याख्या कृतवान्।[5] महाभाष्यकारपतञ्जलेः समयेऽपि मन्त्रोच्चारणाय स्वराणां तादृशं प्राधान्यमासीद् यल्लोकेऽपि स्वरोल्लंघनं क्षमायोग्यं नासीत्।[6] अतो वेदाध्ययने स्वरस्य महत्त्वं प्रायः सर्वैः स्वीकृतम्।

---

1. पा. शि., 52:
   मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
   सवाग्वज्रो यमजानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्;
2. स्वरानुक्र. 1.8:
   अन्धकारे दीपिकाभिर्गच्छन्न स्खलति क्वचित्।
   एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति;
3. शबरः, जै.मी.सू.भा., 9.2.31: अथ त्रैस्वर्यादीनां कथं समाम्नानमिति? उच्यते, अर्थावबोधनार्थं भविष्यति।
4. वाक्यप., 2.318:
   सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
   शब्दार्थस्यानवच्छेदे विशेषस्मृति हेतवः;
5. ऋ.भा.भू., तृतीय संस्करण- वेदार्थोपयोगितया संक्षेपतः स्वराणां व्यवस्था लिख्यते।
6. महाभाष्यम्, 1.1.3: एवं हि दृश्यते लोके यउदात्ते कर्त्तव्येऽनुदातं करोति। खण्डिकोपाध्यायः तस्मै चपेटां ददाति......।

श्रुत्यर्थनिर्णयस्तु स्वरायत्तो वर्तते, परन्तु स्वरस्यान्यदपि प्रयोजनं सम्भाव्यते। पारलौकिकदृशाऽपि वैदिकस्वराः अदृष्टविशेषमपि फलमभिलषन्ति।[1] लोकव्यवहारेऽपि स्वराः सहायकाः। पुराकाले लिपिमुद्रणालयादिसाधनदौर्लभ्यात् वेदानां संरक्षणमध्ययनेनैव कार्यमासीत्। स्वररहितशब्दसङ्घातेभ्यः सस्वराणां धारणं गीतीनामिव सुलभम्। अतो धारणसौलभ्यमपि स्वराणामानुषङ्गिकं फलमिति केचन विद्वांसो मन्यन्ते।[2] अतः स्वरज्ञानं सर्वथा लाभप्रदमिति।

वेदार्थावबोधनाय स्वरा एते पदार्थनिर्णये त्रिधा सहायका भवन्ति- (1) पदस्वरूपज्ञाने (2) वाक्यार्थप्रकाशने च, तद्यथा- वेदमन्त्रेषु नामाख्यातोपसर्गनिपाताश्चेति चतुर्विधानि पदानि प्रयुक्तानि। यदि कस्यचिद् पदविषये सन्देहोपजायते यत् पदमेतत् नाम वाख्यातं वा निपातो वोपसर्गो वेति, तदा चतुर्विधानां पदानां स्वरूपज्ञानार्थं स्वर एव सहायको भवति। विषयेऽस्मिन् 'कः' इति पदमवधेयम्। पदमेत् 'किम्' सर्वनामपदस्य पुंल्लिंग-प्रथमा-एक वचनस्य रूपमथ च अड्भावे लुङ्लकारे को धातोः रूपं भवति। अत्र 'कः' इत्यस्य पदस्य निर्णयः स्वरेणैव सम्भाव्यते यत् पदमेतत् सर्वनामपदमाख्यातपदंवा। यतो हि उदात्तयुक्तं 'कः' पदं सर्वनाम भवति, अनुदात्तयुक्तं चेत् क्रियापदं भवति। एवमेव 'त्व' पदं निपातरूपं सर्वनामरूपं वेत्यत्रचार्ययास्कस्य स्वरानुगामिनं मतमवधार्यमिति। वेङ्कटमाधवोऽपि नाम-आख्यातयोर्विभागं स्वरादेव स्वीकरोति।[3] इत्थं पदानां विभक्तिस्वरूप निर्णये (यथा-आद्युदात्तं 'वाचः' इति पदं द्वितीय बहुवचनस्य रूपमथ चान्तोदात्तं 'वा॒चः' इति/पदं पञ्चमी-षष्ठ्योः एक वचनस्य रूपम्); शब्दानां लिङ्गनिर्णये (यथा- आद्युदात्तं 'र॒क्षेः' पदं नपुंसकालिङ्गस्यापि च अन्तोदात्तं 'रक्षः' पदं पुल्लिङ्गस्य रूपमिति) तथा च समस्तपदानां निर्णये (यथा- अन्तोदात्तम् 'इ॒न्द्र॒पदं' तत्पुरुषस्य रूपमथ च मध्योदात्तं 'इ॒द्रर्पदं' बहुब्रीहिसमासस्य रूपमिति) वैदिकस्वराः सहायकाः भवन्ति।

पदार्थज्ञानेऽपि स्वराणां महती भूमिका, यतो हि स्वरभेदेन शब्दानामर्थभेदो भवति, यथा ऋग्वेदसर्वानुक्रमणीग्रन्थे वेङ्कटमाधवो निर्दिशति यदेकस्य शब्दस्यार्थसाम्ये सति सर्वत्र स्वरसाम्यं तत्रार्थभेदोऽप्युपजायते।[4] स्वरभेदेन शब्दार्थभेदस्य कारणं वक्ताकृतं

---

1. तन्त्रवा., 1.3.9:
   तेनादृष्टार्थ एवायं स्वराठोऽवगम्यते।
   सर्वदा ब्रह्मयमाङ्गद्रव्ययज्ञजपेषु च;
2. द्र.- स्वरसिद्धान्तचन्द्रिका, उपोद्घातः, पृ.
3. नि. 1.7.8: त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम्। तत् कथमनुदात्तप्रकृतिः नाम स्यात्।
4. ऋक्सर्वा॥ परिशिष्ट 4, पँक्ति 8- नामाख्यातविभागश्च स्वरादेववगम्यते।

शब्दांशोपरि बालाघातमेव उच्चारणसमये वक्ता कदाचित् शब्दस्य प्रकृत्यंशे बलं ददाति, कदाचित्तु प्रत्ययांशे। शब्दस्य यस्मिन् अंशे वक्तुः बलं भवति स एवांश उदात्तो भवति, यतो हि उदात्तस्वरः शब्दस्य मुख्यार्थं घोतयति। पुनश्च शब्दस्य यस्मिन् बलं न दीयते, स अनुदात्तांशो गौणार्थं सङ्केतयति, यथाचार्ययास्केन स्वकीये निरूक्त वेदाङ्गे निर्दिष्टम्।[1] उदाहरणार्थ मंत्रस्वरभेदेन भिन्नार्थवाचको 'वेद' शब्दो द्रष्टव्यः। विद् (ज्ञाने) इत्येतस्माद् धातोः अच्प्रत्यये कृते निष्पन्ने वेदशब्दः ज्ञानराशेः शब्दराशेर्वा बोधकः। अयं शब्दः "वृषादीनां च" सूत्रेणाद्युदात्तो भवति (वेदः)। परं विद् (लाभे) इति धातोः। वेगवेदवेष्टबन्धाः करणे इति सूत्रेण घञ्प्रत्ययसंयोगेन निष्पन्नः "उञ्छादीनां च" (6.1.160) सूत्रेणान्तोदात्तोऽपरो वेदशब्दो दर्भमुष्टिवाचको भवति। एवमेव भ्रातृव्यस्य वधाय (यजु. 1.18) इत्यस्मिन् मन्त्रो 'भ्रातृव्य' शब्दः द्वयर्थी वर्तते। अतः पदार्थनिर्णये सन्देहो भवति। अत्रापि सन्देहनिवारणं स्वरशास्त्रेणैव भवति। तदनुसारं भ्रातृशब्देन (शत्र्वर्थे) "व्यन् सपत्ने" (4.1.145) इति सूत्रेण 'व्यन्' प्रत्ययेन निष्पन्नः "ञ्नित्पादिर्नित्यम्" (6.1.197) सूत्रेणाद्युदात्तो भ्रातृव्य शब्दः शत्रुवाचको भवति, परञ्च भ्रातृशब्देन 'भ्रातुर्व्यच्च' (4.1.144) सूत्रेण 'व्यत्' प्रत्ययसंयोगेन "तित् स्वरितम्" (6.1.85) सूत्रेणान्तस्वरितो "भ्रातृव्यः अपरः शब्दः भ्रातृपुत्रस्य द्योतको भवति। एवमेवान्ये शब्दा अतिविवेचितव्याः।"

वाक्येषु शब्दानां स्वरवैभिन्न्यमेवार्थभेदस्य/कारणम् यतो हि कुत्रचित् शब्दः उदात्तस्वरयुक्तः अन्यत्र स एव शब्दः सर्वानुदात्तयुक्तश्च भवति। परन्तु वाक्यस्यार्थः एक एव तर्हि स्वरः भिन्नो न भवति। वाक्यादौ/कानिचित् पदानि उदात्तयुक्तानि भवन्ति परन्तु तान्येवान्यत्र सर्वानुदात्तानि भवन्ति उदाहरणार्थं सम्बोधनपदानि पादादौ आद्युदात्तानि प्रयुज्यन्ते, परन्तु पादमध्ये बलाघाताभावात् सर्वानुदात्तानि भवन्ति।[2] एवमेव[3] क्रियापदानि

---

1. ऋग्वेदानु. 1.8.1:
   अर्थाभेदे तु शब्दस्य सर्वत्र सदृशः स्वरः।
   यदा नतं स्वरं पश्येदन्यथार्थं तदा नयेत्;
2. निरू. 4.25: तीव्रार्थतरमुदात्तम्, अल्पीयोऽर्थतरमनुदात्तम्।
3. ऋग्वेदा., 1.2.2:
   आमन्त्रिताद्युदात्तत्वमुच्चैरामन्त्रणे भवेत्।
   नीचैरामन्त्रणे कार्ये पदं सर्वं निहन्यते; तदेव, 1.1.7-8:
   अथात्र कारणं ब्रूहि वाक्यादौ तिङुदात्तवत्।
   सर्वानुदात्तमन्यत्र नार्थभेदस्तु कश्चन॥
   अर्थभेदादिति ब्रूमः श्रोतारमिह तिङ्पदम्।
   उदात्तवत् समाहान्ति स यथाभिमुखो भवेत्;

वाक्यस्यारम्भे उदात्तस्वरयुक्तानि भवन्ति परन्तु यदा मध्येऽन्ते वा प्रयुज्यन्ते तदा तानि पदानि कदाचित्तूदात्तयुक्तानि कदाचिच्च सर्वानुदात्तयुक्तानि भवन्ति वेङ्कटमाधवस्य मतेऽस्य मुख्यकारणमर्थवैभिन्नयमेव।[1] एवमन्ये बहवः शब्दाः मन्त्रेषु स्वरदृशा स्वकीयमर्थ वैशिष्ट्यं धारयन्ति, येषां विशदविवेचनं स्वरानुक्रमणीग्रन्थेऽथच शिक्षाग्रन्थेषुप लभ्यते। तदनुसारमेव मन्त्रार्थव्यवस्था अनुकरणीय, अन्यथा मन्त्रस्य कृष्यभिप्रेतोऽर्थो न प्रतीयते।

विवेचनेनानेनेत्थं वक्तुं शक्यते यद् मन्त्रेषु प्रयुक्तपदानां वाक्यादीनां चार्थनिर्णये पदानामुदात्तस्वर एव मुख्यं वर्तते। तदनुसारमेव ऋषिदृष्ट्या वैदिकशब्दानामभिप्रेतोऽर्थः ज्ञातुं शक्यत इति निश्चप्रचम्। तथ्यमिदमुररी कृत्यैव बहुभिर आचार्यौः, वैयाकरण्धौः, भष्यकारैश्च स्वरशास्त्रस्योपयोगिता बहुधाविवेचिता। अतो वेदार्थनिर्णय एव स्वरस्य प्रमुखं प्रयोजन मिति ज्ञेयम्। तस्मात्कारणा अमोघनन्दिनी शिक्षाकारः स्वरविहीनां वाणीं तथैव स्वीकरोति यथा वस्त्रविहीना स्त्री, अथ च दरिद्रस्य रूपवती-पत्नी। तस्यमते स्वरविहीनाः वर्णाः प्राणविहीनशरीरमिव शोभामपि न प्राप्नुवन्ति।[2]

✦✦✦

---

1. अमोघ-शिक्षा॥ 126-127: प्रमदारूप सम्पन्ना दरिद्रयेवयोषित्।
2. अमोघ-शिक्षा॥
   स्वरहीना यथा वाणी वस्त्रहीनास्तु योषितः;
   एवं वर्णा न शोभन्ते प्राणहीनाः शरीरिणः।
   वेदपाठी सदा सम्यक् विचार्येवं पुनः पठेत्॥

# शुक्लयजुर्वेदस्य वैज्ञानिकमध्ययनम्

**ओंकार यशवन्त सेलूकरः**
अति. अध्या. वेदभाष्यविभाग
श्री.वें.वे.विश्वविद्यालय, तिरुपति.

वयं सर्वे जानीमः वेदाः तादृशाः उपजीव्यग्रन्थाः सन्ति यतः आध्यात्मिकाधि-भौतिकाधि-दैविकादयः तथा वैज्ञानिक-राजननैतिक-सामाजिक-आर्थिकादयः विविधाः ज्ञानधाराः प्रवहन्ति। अत एव सर्वज्ञानमयो हि स इत्यादिभिर्वाक्यैः गौरवान्विताः इमे ग्रन्थाः। वेदानां विज्ञानपरकत्वं आधुनिकवैज्ञानिकाः मुक्तकण्ठेन स्वीकुर्वन्ति। सर्वमपि आधुनिकविज्ञानं वेदे निहिमिति नास्ति मम अभिप्रायः। किन्तु सर्वे वेदाः विज्ञानपरका एव। वेदनिहितानां केषांचिद् वैज्ञानिकसिद्धान्तानां सत्यता आधुनिकविज्ञानिकैः अनुभूता। अत्र वैदिकविज्ञाने विचारात्पूर्वं ध्यातव्यमस्ति यत् आधुनिकवैज्ञानिकैः यानि सिद्धान्तानि स्वबुद्धिसामर्थ्येन प्रतिपादितानि सन्ति तानि वेदे पूर्वमेव ऋषभिः कथितानि इति वैदिकानां भाषणेन प्रायः वैज्ञानिकाः क्रोधिताः सन्ति। किन्तु आधुनिकवैज्ञानिकैः ध्यातव्यमत्र नात्र वैदिकानां काऽपि अन्यथा मतिः। अतः ध्यातव्यं यत् वैदिकानां वैज्ञानिकपद्धतेः ज्ञानाभावात् अथवा वेदे वैज्ञानिकदृष्ट्या अध्ययनस्य अभावादेव वेदे निहितं विज्ञानं समाजपुरतः स्थापयितुं प्रायः वैदिकाः असमर्थाः भवन्ति। वेदाः विज्ञानपरकाः इत्यत्र नास्ति वैदिकानां सन्देहः। तर्हि आधुनिकवैज्ञानिकैः प्रतिपादितानां सिद्धान्तानां वेदेषु सन्दर्भदर्शनेन समाजे अवैदिकानां कृते वेदानां वैज्ञानिकत्वं साधनाय कृतोऽयं प्रयत्नः इति। यतो हि यत् वैज्ञानिकैः साधितं तदेव सत्यमिति जनानां सामान्यमतिः इदानीं दरीदृश्यते। यदि आधुनिकविज्ञानस्य केषांचित् सिद्धान्तानां वैदिकविज्ञानेन सह साम्यं भवति चेत् सर्वेऽपि वैदिकसिद्धान्ताः पूर्णरूपेण वैज्ञानिका एव। यदि आधुनिकविज्ञानेन वैदिकविज्ञानस्य सिद्धता न भवति चेत् तत्तु आधुनिकविज्ञानस्य दोषः असफलता वा अस्ति न तु अत्र वेदस्य अवैज्ञनिकत्वम् कल्पनीयमिति मम भावः। यतो हि आधुनिकविज्ञानं इन्द्रियगोचरपदार्थान् एव स्वीकरोति। अर्थात् विज्ञानमेतद् प्रत्यक्षपरकमेव। किन्तु वेदविषये प्रायः प्रसिद्धोक्तिरेवास्ति यत्

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते॥**

**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता।** इति।

पत्रेऽस्मिन् शुक्लयजुर्वेदनिहितं विज्ञानं उपस्थापयितुं कानिचित् उदाहरणानि संकलितानि

सन्ति। तर्हि पक्वान्नोदन न्यायेन समस्त शुक्लयजुर्वेदस्यविज्ञानपरकत्वं अवगच्छन्तु भवन्तः।

शुक्लयजुर्वेदे प्रथमाध्याये एकः मन्त्रः पठ्यते।

**"पुराक्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम्।**
**यामैरयंश्चन्द्रमसि स्वधाभिस्तामु धीरासो अनुदिश्य यजन्ते॥"इति**[1]

दर्शपूर्णमासयागे वेदिखननानन्तरं विविधगर्तयुक्तां वेदिं समीकरणे अस्य विनियोगः। प्रयोगस्यास्य हेतुप्रदानावसरे महर्षिणा याज्ञवल्क्येन शतपथब्राह्मणे एका आख्यायिका उद्धृता। शतपथोक्तमन्त्रः ईदृशः-

"देवा ह वै संग्रामं सन्निधास्यन्तस्ते होचुः- हन्त यदस्यै पृथिव्या अनामृतं देवयजनं तच्चन्द्रमसि निदधामहै। स यदि न इतो असुरा जयेयुः, तत एवार्चन्तः श्राम्यन्तः पुनरभिभवेमेति। स यदस्यै पृथिव्या अनामृतं देवयजनमासीत्तच्चन्द्रमसि न्यदधत। तदेतच्चन्द्रमसि कृष्णम्..... इति।[2]

**मन्त्रे अस्मिन्नुद्धृतायाः कथायाः सारः-**

पुरा असुराः मुहुर्मुहुः देवैः सह युद्धं कृत्वा देवेभ्यः सकाशात्पृथिवीं जयन्ति स्म। तदा देवताः असुरसकाशात् यागयोग्यं भूमिं भिक्षारुपेण याचयित्वा भिक्षादाने प्राप्तायां भूमौ यज्ञानुष्ठानं कृत्वा तेन यज्ञेन कृत्स्नां पृथिवीं जयन्ति स्म। देवाः परस्परं विचारं कृतवन्तः 'इतः परं यद्यसुरैः पुनः युद्धे इयं पृथिवी जिता चेत् कदाचित् ते अस्मभ्यं यागार्थं पुनः भुमिं न प्रदास्यन्तीति। एवं पृथिवीतः निष्काशिताः वयं कुत्र तिष्ठामः यागं च कथं कुत्र वा कुर्मः। अतः युद्धात्पुर्वमेवास्माभिः पृथिव्याः यागयोग्यो भागः, स चन्द्रमसि स्थातव्यः। एवं भूते सति भविष्ये असुरैः पृथिवीतः निष्कासिताः वयं चन्द्रमसि गत्वा पुनः यागं परिचरामः। तेन च यज्ञेन पुनः पृथिवीं जेष्याम इति। एवमुक्त्वा महर्षि याज्ञवल्क्यः कथयति यत् वर्तमाने चन्द्रमसि यत् कृष्णत्वं वयं पश्यामः तद्देवैः स्थापितः पृथिव्याः एव भागः।[3]

ब्राह्मणस्य अयमेव भावः मन्त्रभाष्यदर्शनेनापि अवगम्यते यथा

**"पुराक्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम्।**
**यामैरयंश्चन्द्रमसि स्वधाभिस्तामुधीरासोऽनुदिश्य यजन्ते॥"इति**[4]

---

1. शुक्लयजु. मा.सं. १/२८
2. शुक्ल.मा.शत.ब्राह्म. १/२/५/१८
3. स यदस्यै पृथिव्या अनामृतम् देवयजनमासीत्तच्चन्द्रमसि न्यदधत। तदेतच्चन्द्रमसि कृष्णम्।
4. शुक्लयजु. मा.सं. १/२८

अस्य मन्त्रस्य भाष्यसमये महिधराचार्याः कथयन्ति यत्–हे विरप्शिन् विष्णो त्वं श्रृणु। देवासुरयुद्धात्पुरा देवाः, जीवदानुं–जीवं ददातीति जीवदानुं, यां जीवनस्य धर्त्रीं सारभूतां पृथिवीं, उदादाय–ऊर्ध्वं गृहीत्वा, स्वधाभिः– वेदैः (अन्नैः वा) सह, चन्द्रमसि–इन्दौ, ऐरयन्–स्थापयामासुः।[1] तामेवानुद्दिश्य धीरासः यजन्ते।

### वैज्ञानिकसिद्धान्तः

सर्वप्रथमस्तावत् एतत् तु स्पष्टं भवति यत् अनेन प्रसंगेन ऋषयः अस्मान् ज्ञापयितुं इच्छन्ति यत् वयं परग्रहे गन्तुं शक्नुमः इति।

वर्तमानसमये अपि आधुनिकाः वैज्ञानिका अपि देवतावदेव चिन्तिताः सन्ति। यदि अस्माकं राष्ट्रे परराष्ट्रस्य आतंकवादिसदृशानां असुराणां वा आधिपत्यं भवति चेत् अस्माकं लोककल्याणाय महता प्रयत्नेन कृतानि सर्वाणि संशोधनकार्याणि वयं कुत्र स्थापयामः संरक्षयामो वा। स्थितावस्यां विश्वस्य सर्वेषां वैज्ञानिकानां कृतेऋषिः अत्र देवासुरसंग्रामकथा माध्यमेन समाधानं कथयति। अर्थात् देववदेव वयमपि सर्वाः विद्याः, अन्नं, जीवनतत्त्वानि च भूमितः स्वीकृत्य चन्द्रमसि गत्वा पुनः यागादिवदेव विविधान् वैज्ञानिकप्रयोगान् कृत्वा यथानुकूलं पुनः पृथिवीं प्राप्तुं शक्नुमः।

अपरं वैज्ञानिकतत्त्वं अत्र प्रतिपादितं वर्तते यत् सर्वेषु ग्रहेषु चन्द्रमा तादृशः अस्ति यत्र जीवनं संभवति इति याज्ञवल्क्यः उपदिशति। अयमेव सिद्धान्तः आधुनिकैः अपि प्रतिपादितो वर्तते।[2]

### द्वितीयप्रसंगः

शतपथब्राह्मणे मनोवाग्भ्यां अहमेवभद्रः अहमेवभद्रः इति स्वोत्कर्ष विषयेकृतः संवादः प्रसिद्धमेवास्ति। तत्रमनः स्वभद्रत्वविषयेवदति यथा हेवाक्त्वंमया अविषयीकृतं किमपि न वदति। अतःत्वं मम कृतानुकरा (अनुगन्त्री) भवसीति।

वाक्कथयति यत्नः अहमेवत्वत्तः सकाशात्श्रेयसीति। यतोहि यत्वस्तुत्वं वेत्थ अहं तत्विज्ञापयामि। तदन्तर्गत विषयं परेषां संज्ञापयामि। अतः त्वत्तः अहमेव श्रेयसीति।

एवं विवदमाने ते प्रजापतिं प्रतिजग्मतुः। तदासप्रजापतिः मनसएव अनुकूलमुवाच। एवं मनस अनुकूलं प्रजापतिना उक्ते सति सा वागतिदुःखवशाद्भग्नवीर्या बभूव। तस्मात्कारणादेव मनुष्यादीना मुत्पत्तिहेतुः योगर्भः सोऽपि पपात। खिन्ना सावाक्प्रजापतिम् उक्तवती यत्हे प्रजापतेयांमां पाराजितत्वेनोक्तवानसि अतःतुभ्य महम् अहव्व्यवाट् भूया समिति।

---

1. शुक्लयजु. मा.सं. १/२८ मन्त्रस्य महीधराचार्यस्य भाष्यम्।
2. विकिपिडिया मध्ये चन्द्रमा इति विषये एतत् सत्यं वर्णितमस्ति यत् भविष्ये चन्द्रमा मनुष्ययुक्तः भविष्यतीति वैज्ञानिकानां मतमस्ति।

पतितं तं वाचोगर्भं (रेतंवा) देवाःचर्मणि अन्यस्मिन्वापात्रेधृत्वा प्रतिदिनं तस्यपालनं कृतवन्तः। प्रतिदिनं परस्परं पृच्छन्ति स्मयत् अत्रैवत्या ३ इति। अर्थात् अत्र पात्रेप्रसिद्धरेतः कथं भूतम् इति विचारयन्ति। यस्माद्देवैः विचारितंतस्मात्अगर्भःअत्रिःइतिनाम्नासम्बभूव। इत्यस्तिब्राह्मनोक्ताकथा। अस्याः वैज्ञानिकतायाःविचारः कुर्मश्चेत्मनोविज्ञानं चिकित्साविज्ञानं वा स्पष्टमेवभवति यत्यदि काचित्स्त्री गर्भवतीस्यात् तदा साकिमपिदुःखं नानुभवेत् इति ध्यातव्यमस्ति। यदि सा अतिदुखं अनुभवेच्चेत्तस्य साक्षात्परिणामः गर्भोपरिभवति इति विज्ञानं अनेन कथानकेन ऋषयः अस्माकं पुरतःस्थापितवन्तः।

अपरं वैज्ञानिकं तत्वं अनेन ज्ञापयन्ति यद्गर्भाशयात् बहिपतितं गर्भमपि गर्भाद्बहिः पालयितुं शक्यते इति। कन्याभ्रूणघात विषये अस्य विज्ञानस्य वर्तमान समये महती आवश्यकता भासते इति वयं सर्वे जानीमः।

**तृतीयः प्रसंगः**

शतपथ ब्राह्मणस्य द्वितीय काण्डे अग्निहोत्र ब्राह्मणे अग्नि विषये उक्तमस्ति यत्प्रजापतिर्हवा इदमग्र एक एवास। स ऐक्षत कथंनु प्रजायेय इति। सोऽश्राम्यत् स तपोऽतप्यत सोऽग्निमेव मुखाज्जनयां चक्रे। तद्यदेनं मुखादजन यततस्मादन्नादोऽग्निः। सयोहैव मेतमग्नि मन्नादं वेद, अन्नादोहैव भवति।।

तद्वा एनमेतदग्रे देवानाम जनयत तस्मादग्निः। अग्निर्हवैनामैतद्यदग्निरिति। सजातः पूर्वः प्रियाय। योवैपूर्व एति अग्रएतीति वैतमाहुः साउएवास्य अग्निता।[1]

अत्रकथानकानुसारम्प्रजापतिः सर्वप्रथमं अग्निमेवजनयां चक्रइति। सोऽअग्निः मुखादुत्पन्नः तस्माद् अन्नादः। उत्पन्नः सः अग्निः अन्नस्यैव अन्वेषणं कुर्वन् अन्यसृष्टिर भावात् प्रजापति मेव भोक्तुंगतिं करोति स्म। अतः एव संसारे गमनधर्मः सर्वप्रथमं अग्नावेवास्तीति ऋषिः ज्ञापयति अस्मान्। अतः एव यो वै अग्रेपूर्वं एति (गच्छति) तस्मात् अग्निः इति निर्वचनेन गमन सामर्थ्यादेव तम् अग्नि इति नाम्ना सम्बोधयति। अथवा एषा गमन क्रिया एव अग्नेः अग्निता इति स्पष्टतया ब्राह्मणोल्लेखः ब्राह्मणे कृतः।[2]

अनेन एतद्विज्ञानं ऋषयः प्रतिपाद यन्तिय त्संसारे गमन क्रियामात्र अग्नेरेव धर्म इति। अतः लोकेऽपिवयं पश्यामः यत्संसारेयत्र कुत्रापि गमनप्रक्रिया दृष्यतेतत्र अग्निरेव कारणमिति। यथा मनुष्याः तावदेव पर्यन्तं गमने समर्थाः सन्तियावत्तेषु अग्नेः सत्तावर्तते। एवमेवसर्वेऽपि जीवाः अग्निसामर्थ्ये नैवगतिं कुर्वन्ति। न केवलं जीवाः अपि जडपदार्था अपि। यथाजलेयागतिः दृष्यते सा अपि अग्निना एव। यदा फ्रिज माध्यमेन वयं जले

---

1. शतपथब्राह्मणम् २/२/४/२
2. तत्रैव- योवै पूर्व एति अग्रएतीति वैतमाहुः साउ एवास्य अग्निता

निहितस्य अग्नेः मात्रां न्यूनंकुर्मः चेत्तस्य गतिः न भवति। अपितु पाषाण वदेव स्थायीभावमाप्नोति। येषु जडपदार्थेषु गमनक्रिया साधनीया वर्तते तत्रापि यथाकार-बस-ट्रेन-विमानयानं इत्यादीनां जडपदार्थानां गत्यर्थं अग्निरेव कारणम्। तात्पर्यतः वेदेसूत्र रूपेण अग्नेः अग्निता विषयकं ज्ञानं लोके कियत्प्रासंगीकमस्ति इतिवयं प्रत्यक्षं अनुभवामः।

समाजविषये विचारं कुर्मश्चेत्उत्कृष्टसमाजस्य राष्ट्रस्य वास्थितिः कथंस्यात् अस्य सम्यक् उदाहरणं जुहूपभृतौ आज्यग्रहण प्रसंगे उपपत्ति प्रदानावसारे महर्षि याज्ञवल्क्यः शतपथ ब्राह्मणे उपदिष्टवन्तः। तत्र जुहुपात्रे चतुर्वारं आज्यं गृह्णाति अध्वर्युः उपभृतौ च अष्टवारम् इति। तत्र जुहुपात्रं अत्तुः (भोक्तुः) प्रतीकमस्ति उपभृत्च अन्नस्य। तदाजुहू प्रभृतयोः असमानमाज्यग्रह णेनअनेन प्रसंगेन ऋषिः उत्कृष्ट समाजस्य सूत्रमेव प्रतिपादयति। तत्र ऋषिः कथयति यत्समाजे अपि एतादृशी एव स्थितिः स्यात् यत्र अन्नं बहुस्यात्किन्तु अत्तारः न्यूना इति। अतः अन्नभूतायां उपभृतौ अत्ताभुतायाः जुह्वापेक्षया अधिकमेव आज्यंस्वी कुर्यादिति। निसंदेहेन वक्तुं शक्यते यत् ऋषेः समाजविषये कृतं चिन्तनं उत्कृष्ट समाजस्यैव स्वरूपमस्ति। यतो हि यत्र भोक्तारः बहवः सन्ति किन्तु अन्नस्य अभावः न्यूनता वा भवति चेत् समाजे किदृशी अराजकता उत्पद्यते अथवा कथं समाजस्य अवनतिः भवति इति वयं सर्वे जानीमः। अतः उक्तं महर्षिणा याज्ञवल्क्येन शतपथ ब्राह्मणे।

**तद्धि समृद्धम् यत्र अत्ता कनीयान् आद्यो भूयान्॥** इति।[1]

## राष्ट्रचिन्तनम् (राजनीति विज्ञानम्)

राष्ट्रचिन्तनविषये अनेकत्र अनेका सिद्धान्ताः ऋषिणा प्रतिपादिता सन्ति। उदाहरणरूपेणात्र राष्ट्रप्रार्थनायां प्रतिपादितानां केषाञ्चित् सिद्धान्तानां चर्चां कुर्मः। यद्यपि मन्त्रेऽस्मिन् ऋषिः अस्मान् राष्ट्रस्य उन्नत्यर्थं दशसूत्राणि प्रतोपादितानि सन्ति। किन्तु समयाभावाद्त्र मात्र सूत्रत्रयाणामेव विचार क्रियते।

राष्ट्रस्य आर्थिकक्षेत्रे विचारः कुर्मः चेत् एकंसूत्रंयाज्ञवल्क्येन शुक्लयजुर्वेदे प्रदत्तम। स सिद्धान्तः इदानीमपि अत्यन्तं प्रासंगिकमस्तिं। तद् सूत्रमस्ति

**योगः क्षेमः कल्पताम्॥ इति।**[2]

सूत्रेऽस्मिन् उभावपि शब्दौ पारिभाषिकौस्तः। तत्र अलब्धलाभोयोगः इति कथ्यते। लब्धस्य चिरकाल संरक्षणं क्षेम इत्यस्य अभिप्रायः। सूत्रमिदं राष्ट्रस्य आर्थिक क्षेत्रे अस्मभिः उपयुज्यते चेद्राष्ट्रस्यास्य बृहद् प्रगतिर्भवती त्यत्रनास्ति सन्देहः। वयं सर्वे

---

1. शतपथब्राह्मणम् - १/३/२/१२
2. शुक्लयजुर्वेद सं. २२/२२

जानीमः यद्राष्ट्रस्य मानवस्य च उन्नतौ धनस्य महती भूमिका वर्तेत इति। तस्य धनस्य योगाय राष्ट्रे व्यवस्था संपादनीया वर्तते। येन राष्ट्रे कोऽपि वृत्तिहीनः (बेरोजगारः) न स्यात् इति अभिप्रायः। तथा तस्य धनस्यक्षेम व्यवस्था अपि शासनेन सम्यक् सम्पादनीया इति क्षेमस्य अभिप्रायः। अर्थाद्राष्ट्रे तादृशी व्यवस्था कार्या योगकृतं धनं चिरकालं यावत् संरक्षणं भवेदिति। अर्थात् आधुनिक भाषायां वदामः चेत्बैंकिंग व्यवस्था अत्यंत प्रभाव शालिनी स्यादित्युच्यते। वर्तमान समये वयं पश्यामः यद् ऋषेः प्रतिपादितस्य सूत्रस्य परिपालनं कियदावश्यकं मस्तीति। अस्माकं राष्ट्रेधनस्य योगव्यवस्था सम्पादनीया वर्ततेयेन धनार्जनेन अस्माकं राष्ट्रस्य विकासः साध्यः। तथा राष्ट्रे धनस्य क्षेम व्यवस्था अपि तादृशी भावनीया यया भारतीयानां सर्वेषां धनं अस्माकं राष्ट्रे एव सुरक्षितं स्यान्न पर राष्ट्रे। वयं पश्यामः इदानी मपिभारतवर्षेक्षेम व्यवस्थायाः अभावात्कारणात्कथं भारतीय केचन जनाः परराष्ट्रेभारतस्य धनंदत्तवन्तः येनधनेन भारत राष्ट्रस्य विकासः करणीयः आसीत्तेनैव धनेन स्वकीयं परराष्ट्रं महद्वकासं कृतवन्तः। अतः इदानीम् ऋषिभिः प्रदत्तस्यक्षेम सूत्रस्यमहती आवश्यकता भासते। सूत्रानुसारं अस्माकं राष्ट्रे तादृशी बैंकिंग व्यवस्था भावनीया येनभारतीयानां धनं मात्रभारतीय बैंकिंग मध्ये एव संरक्षणं भवेदिति। अनेन प्रकारेण शुक्ल यजुर्वेदोक्तयोगक्षेमः कल्पता मिति सूत्रस्य इदानीम् अनुकरणं भवेदेवयेन समाजस्य राष्ट्रस्यच उन्नतिः भविष्यति।

अस्मिन्नेव मन्त्रस्यास्य प्रथमभागे एव ऋषयः अस्मान् उपदिष्टवन्तः यदस्माकं राष्ट्रे सर्वाप्रजाब्रह्मवर्च- सीजायतामिति।[1] अत्र ब्रह्मशब्दः ज्ञानस्यवाचकः एवं वर्चोस्नामतेजसः अर्थाद्राष्ट्रे प्रजाज्ञानेन परिपूर्णास्यात् साक्षरः स्यादिति। वयंसर्वे जानीमः यराष्ट्रोन्नतौ साक्षरतायाः महती भूमिका वर्तते इति। वर्तमान समयेत देवराष्ट्रं विकसित राष्ट्रत्वेन कथ्यतेयत्र शिक्षायाः प्रमाणं अधिकं स्यादिति। वर्तमानभारते ऋषिणा उपदिष्टस्य अस्यसूत्रस्य कार्यान्वयाभावाद्राष्ट्रेऽस्मिन्शिक्षायाः स्तरः यथा ऋष्यनुकूलं नानुभवामः। राष्ट्रेऽस्मिन् अद्यापि जनता प्रायः अशिक्षिता एव। अनेन राष्ट्रस्य विकासे काठिन्यम् अनुभवामः।

अस्मिन्नेव मन्त्रे राष्ट्रोन्नत्यर्थं एकं महत्वपूर्णं सूत्रं प्रतिपादितमस्ति। सूत्रमस्ति सप्तिः आशुः जायता मिति। अत्र सप्तिः इति अश्वस्यनाम आशुः इति शीघ्रगतेः वाचकः। अतः सूत्रार्थो भवति अस्माकं राष्ट्रेसप्तिः आशुः जायतामिति। वयंसर्वे विद्मः यत्प्राचीन कालेमनुष्यैः ग्मनागमनाय अश्वस्य उपयोगः क्रियतेस्म। वर्तमान समये एषा प्रक्रिया बस-ट्रेन-विमानादि माद्यमेन संपाद्यते। अतः ऋषेः अभिप्रायः अस्तियत्यदि राष्ट्रस्य उन्नतिः अपेक्षते चेत्मानवानां गमनागमन साधनानि अत् यंतआशुः गतियुक्तानि कुर्वन्तु इति। मानवानां गतिः एव राष्ट्रस्य प्रगतौ कारणमस्ति। गत्यैवप्रगतिः भवति। वर्तमान समये ऋषेः अयं सिद्धान्तः अन्यप्रगतराष्ट्रैः यथावत् स्वीकृत्य विकसित

---

1. शुक्लयजुर्वेद सं.-२२/२२

राष्ट्ररूपेण प्रसिद्धाः जाताः। यथा वयं पश्यामः अमेरिकाजर्मनादि विकसित राष्ट्रे मनुष्याः वायुवेगेन प्रवासं कुर्वन्ति। अस्माकं राष्ट्रस्य विकासाय अपि अस्माभिः अयं गतेः सिद्धान्तः अनुकरणीयः एव।

एवमेव समाजे स्त्रीणां विषये महर्षिः कथयति यत्

**योषा पुरन्धिः जायताम् इति।**[1]

योषानाम स्त्री सापुरन्धिः अर्थात्पुरं शरीरं दधाति धारयतीति पुरन्धिः। अर्थात् स्त्रीपूर्ण शरीर धारीस्यात्। अस्य अर्थद्वयं भवति। यदि राष्ट्रस्य विकासः करणीयः चेद्राष्ट्रस्य स्त्री संम्यक् पालनीया इति। वर्तमाने वयं पश्यामः कथं गर्भे एव स्त्रीणां शरीर धारणात्पूर्व मेवनाशो भवतीति। यदि समाजे स्त्रीपूर्ण शरीर धारी भवति चेत्तस्याः सकाशात् उत्पन्नस्य समाजस्य राष्ट्रस्य वा उद्धार कल्पना निरर्थकी एव। अतः राष्ट्रोद्धाराय स्त्रीणां संरक्षणं अनिवार्यम्।

सूत्रस्यास्य द्वितीयः भावार्थः एवं भवति यदि राष्ट्रस्य उद्धारः अपेक्षते चेत्स्त्री पुरन्धिः अर्थात् सर्वगुणसम्पन्नास्या दिति।[2] निश्चयेन वक्तुं शक्यते यत्यदि स्त्री सर्वगुण सम्पन्नं भवति चेत्तदुत्पन्नः समाजोऽपि सर्वगुण सम्पन्न एव भवतीति।

अनेन प्रकारेण मन्त्रे अस्मिन्दश सूत्राणि प्रतिपादितानि सन्तियेषां अनुकरणेन समाजस्य उन्नतिः भविष्यतीत्यत्र न कश्चित् सन्देहः।

उपरि उद्धृतानि उदाहरनानि दृष्ट्वा ज्ञायतेत् अस्माकं प्राचीन शिक्षा प्रणाल्ल्यां प्रतिपादन शैली अल्पाक्षरमसंदिग्धं सारवद्विश्व तोमुखम् इत्यनुसारं सूत्रवत् अल्पाक्षरेषु विश्वसारं प्रतिपादनसामर्थ्य युक्ता आसीत्। अतः वेदे निहितं विज्ञानमपिसूत्रवदेववर्तते। तान्सूत्रबद्धसिद्धान्तान्स्वीकृत्य विविध प्रयोगमाध्यमेन विराट् स्वरूप दर्शनंतुयथा बुद्धिकौशलानुसारं अस्माभिरेव भावनीयमस्ति। शुक्लयजुर्वेदेऽपि वैज्ञानिक सिद्धान्तानां प्रचुरता वर्तते। किन्तु अस्माकं दृष्टिरपितादृशीस्यात्। प्रायः जनाःमात्र आध्यात्मिकोन्नत्यर्थं कस्य चिद् ग्रहस्य पीडाशमनाय, धन-पुत्रादिकामना सम्पादनाय, षोडश संस्कारादिनैमित्तिक कर्मसम्पादनायैववेदमाश्रयन्ति। अतःध्यातव्यंयद् नेमेवेदाः मात्रस्वार्थोन्नतिपराः। अपितु समस्त विश्वस्योन्नत्यर्थं सामस्त जीवानां संवर्धनाय, समस्तब्रह्माण्डस्य उत्पत्ति-पालन-लयविज्ञानस्य प्रतिपादकाः सन्ति। परिणामातः तयैवधिया वेदाध्ययनस्य आवश्यकता वर्तते। अनयैवधिया शुक्लयजुर्वेदे निहितं वैदिक विज्ञानमवगन्तुं वयं समर्थाः भविष्यामः।

✦✦✦

1. शुक्लयजुर्वेद सं.-२२/२२
2. अस्य अन्त्रस्य महीधराचार्यस्य भाष्ये द्रष्टव्यः।

# वैदिकसंस्कृतौ स्त्रीणामधिकाराः

**रामदेवः**

सहायकप्राध्यापकः, संस्कृतविभागः

चौ. देवीलालविश्वविद्यालयः सिरसा, हरियाणाराज्यम्

नस्त्रीःस्वातन्त्र्यमर्हति[1]इत्येवोपदेशं स्वीकृत्य महर्षेः मनोः तात्पर्यार्थमजानन्तः केचन भारतीयसंस्कृतिः पुरुषपक्षपातीति स्त्रीसमाजस्य विरोधीति मनुः पक्षपातीति वा आक्षिपन्ति।परन्तु तदानीं कीदृशी आसीत् स्त्रीणां स्थितिः? के च आसन् तासामधिकाराः? मनोर्वाक्यस्य कः वास्तविकाभिप्रायः? वैदिककाले के आसन् स्त्रीणामधिकारः स्मृतिकाले च? एतेषां प्रश्नानामुत्तरैरेव मनोर्वाक्यस्यास्य अर्थ अवगन्तुं शक्य अस्माभिः।

**अध्ययनाध्यापनकर्मसु स्त्रीणामधिकारः-**

कस्यचिदपि समाजस्य कस्यचिदपि वर्गस्योत्थानहेतवे शिक्षास्वातन्त्र्यशक्तीकरण-मेवाऽऽधारत्वेन ग्राह्यं भवति। वैदिककाले स्त्रीणां शिक्षायाः व्यवस्था आसीत्। पुत्रवत् तासामपि उपनयनादिसंस्कारेषु अधिकार आसीत्। वेदाध्ययनेऽपि तासामधिकारोऽङ्गीक्रियते। गृहस्थजीवनसम्बद्धविषयेषु तासां योग्यत्वमभीष्टमासीत्। वैदुष्यमासाद्य ताः यज्ञादिकर्मणि विद्याविवादे मन्त्रदर्शनकर्मण्यपि प्रावर्तन्त। एतस्मादेव कारणात् वैदिककाले स्त्रीणां शिक्षोपनयनादिषु अधिकारो परिलक्ष्यते -पुराकाले तु नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनं च वेदानां सावित्रीवाचनं तथा।। (स्मृतिचन्द्रिकायाम्)

वैदिककाले तु नैकाः ऋषिकाः वैदिकमन्त्राणां साक्षात्कारं कृतवत्यः द्रष्टुं शक्यते। तत्र काश्चन सन्ति - घोषा अपाला विश्ववारा दाक्षायणी श्रद्धा कामायनी लोपामुद्रा रोमशा ब्रह्मवादिनी गोधा सावित्री सूर्या चेत्याद्याः ऋषिकाः समुल्लसन्ति याभिरनेके सूक्तानि मन्त्राः वा दृष्टाः।

**स्त्रीणां वरचयनस्याधिकारः -**

ब्रह्मचर्यपूर्वकं वेदाध्ययनस्य यो नियमः तमेवाश्रित्य वैदिककाले कन्या युवानं पतिं विन्दते स्म इति ज्ञायतेऽथर्ववेदस्य मन्त्रेण- **ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।**[2]

---

1. मनुस्मृतिः 9/3
2. अथर्ववेदे 11/5/18, ऋक्. 10/85

अनेन अनुमातुं शक्यते यद् वेदेषु युवानमेव पतिमधिगन्तुं युवतिरेव विवाहार्हा भवति न बाला।अत एव वेदेषु बालविवाहनिषेधः प्रतिभाति।युवावस्थायां दुर्भाग्येण वैधव्यं प्राप्तवत्याः युवत्याः पुनर्विवाहोऽपि प्रायो देवरेण सह प्रथित आसीत्। कारणं निरुक्ते यास्केन देवरशब्दस्य निर्वचनं द्वितीयवररूपेण कृतं वर्तते। ऋग्वेदे देवरेण सह तासां विवाहप्रसङ्गो द्रष्टुं शक्यते।किन्तु वैधव्याप्तानां स्त्रीणां कृते नासीत् कोऽपि प्रतिबन्धः। तत्रैव ऋग्वेदे–

**उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुपशेष एहि।**
**हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभिसम्बभूव।।**[1]

विवाहसम्बन्धमधिकृत्य वैदिकवाङ्मये स्त्रीणां कृते न केवलं पतिवरणस्य अधिकार एव आसीदपितु गन्धर्वविवाहेन सार्धमेव अन्तर्जातीयविवाहस्यापि परम्परा आसीत्।राज्ञो रथवीतिनः कन्यया सह ऋषेः श्यावाश्वस्य प्रणयप्रसङ्गोऽथ च पुरुमित्रस्य कन्यया सह ऋषेर्विमदस्य विवाहप्रसङ्गोऽत्र स्मरणीयः युवं रथेन विमदाय शुन्ध्युध्वं न्यूहथुः पुरुमित्रस्य योषताम्।।[2]

एवं स्त्रीणामभीष्टवरचयनेऽधिकारः वैदिककालादेव विद्यते।तत्रापि द्वितीयविवाहस्य गन्धर्वविवाहस्य अन्तर्जातीयविवाहस्य च विशेषाधिकाराऽऽसन् इति

### धार्मिककर्मणि अनुष्ठानकर्मणि वा स्त्रीणामधिकारः –

वैदिकवाङ्मये द्वावपि स्त्रीपुरुषौ सृष्टिरथस्य चक्रत्वेन उररीकृतौ अतस्तयोः समत्वेकत्वञ्च मन्यते। शतपथब्राह्मणे यज्ञो वै श्रेष्ठतमं कर्म[3] इत्युक्त्वा यस्य कर्मणो महत्त्वमनेकधा प्रोक्तं तस्मिन् महत्कर्मणि तु स्त्रीं विना पुरुषाणामधिकार एव नाङ्गीकृतः। अत एव अयज्ञीयो हि योऽपत्नीकः[4] इत्युक्त्वा स्त्रीणामधिकारः यज्ञादिकर्मणि बहुधा प्रतिपादितः।

### युद्धकर्मणि अधिकारः –

वैदिकवाङ्मयस्य अनुशीलनेनावगम्यते यत् समाजस्य प्रत्येकं कर्मणि स्त्रीणामधिकार आसीत्। यतो ऋग्वेदस्यैकस्मिन् मन्त्रे प्रोक्तम् – स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य सेना।[5] विश्पला इन्द्रसेनाऽर्थात् मुद्गलानीत्याद्याः स्त्रिया युद्धकर्मणि

---

1. ऋक् 10/18/8
2. ऋक् 10/39/7
3. श.ब्रा. 1/7/1/5
4. तै.ब्रा. 2/22/6
5. ऋक्. 5/30/9

सम्पृक्ताः प्रोक्ता वैदिकवाङ्मये। पुरं नगरं दधातीति पुरन्ध्रिरिति निर्वचनेन ज्ञायते यद् स्त्रीणां कृते बहुधा प्रयुक्तः पुरन्ध्रिरिति शब्दोऽपि तस्या रक्षणशक्तिमभिव्यनक्ति।।

**सम्पत्तेरधिकारः-**

मनुस्मृतौ अष्टमाध्याये राजधर्मं कथयन् मनुः स्त्रीधनस्य रक्षणं राज्ञः कर्तव्यम्। पतिधनस्य सङ्ग्रहे व्यये चासीत् स्वातन्त्र्यम्- अर्थस्य संग्रहे चौनां व्यये चौव नियोजयेत्।।[1] स्त्रीधनस्य सम्पत्तेर्वा विषये मनोर्वाक्यम्-

**अध्यग्न्यध्यावाह्निकं दत्तं च प्रीतिकर्मणि।**
**भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्।।[2]**

**वैदिककाले गृहस्वामिनीपदे नारी -**

वैदिकसाहित्यानुशीलनेन विज्ञायते यद् वैदिककाले स्त्रीणां स्थानमतीव गौरवास्पदमासीत्। सा गृहिणी गृहस्वामिनी सहधर्मिणी इत्यादिभिर्विशेषणैः संबोध्यते स्म। पत्नीरूपेण सा गृहस्वामिनीपदम् अलमकरोत्। श्वशुर-श्वश्रवादिषु तस्या अधिकारो मन्यते स्म -

**सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रवां भव।**
**ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु।।[3]**

एतदेव समर्थ्यते यद् गृहिणीहीनं गृहमरण्यसदृशम्। गृहस्य शोभा नार्या वर्धते। धर्मशास्त्रीयग्रन्थेषु यो महिमा वर्णितः तस्य मूले तु गृहिणी एव भवति।

**न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते।**
**गृहं तु गृहिणीहीनमरण्यसदृशं मतम्।।[4]**

**समाजस्यार्धांशरूपा नारी -**

शतपथब्राह्मणे जाया अर्धांशरूपेण अङ्गीकृता वर्तते 'अर्द्धो ह वा एष आत्मनो यज्जाया, तस्माद् यावज्जायां न विन्दते नैव तावत् प्रजायते असर्वो हि तावत् भवति। अथ यथैव जायां विन्दते तर्हि हि सर्वो भवति।[5] वस्तुतः स्त्रीपुरुषाणां मिथ एव समाजः। तत्र वैदिककालादेव अस्माकं पूर्वजैः स्त्रीणां समाजेऽर्धांशत्वं स्वीकृत्य तासामधिकाराः सर्वत्र सर्वेषु कार्येषु विधिनियमेषु च सन्तीति प्रतिष्ठापितम्।

1. मनु. 9/11
2. मनु. 9/114
3. ऋक् 10.85.46
4. महाभारतम्, शान्तिपर्वणि 144/6
5. शतपथब्राह्मणे 5/2/1/10

**मानवाधिकारः -**

स्त्रीणामपहरणे चोरो वधमर्हति(मनु.) इति कथयति मनुः। इति विधिनियमेन ज्ञायते यद् वैदिककालादेव स्त्रीणां विषयेषु समाजः जागरित आसीत्। तासामधिकाराः तासां प्रतिष्ठा च यथा सुरक्षिताः स्युः तादृशी व्यवस्था तदानीन्तने विधाने दृश्यते। 'अतिथिदेवोभव' इति भारतीयसंस्कृतिः। परन्तु मानवाधिकार आदौ अनन्तरं परम्परा अत्र मनोर्विधानम् -

**सुवासिनीः कुमारीश्च रोगिणो गर्भिणी स्त्रियः।**
**अतिथिभ्योऽग्र एवैतान्भोजयेदविचारयन्।।**[1]

अद्यत्वे मानवाधिकारविषयिणी चर्चा सर्वत्र श्रूयते। परञ्च एषा चर्चा वैदिककालादेव जायमाना अवलोक्यतेऽस्माभिः। सर्वेभ्यः भोजनं, सर्वेषां कृते आवासव्यवस्था, स्त्रीपुरुषयोः समानता च इत्येव मानवाधिकाराः वस्तुतः। अत एव स्त्रीणां मानवाधिकारे मनोर्वचनमिदम्-

**तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।**
**भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च।।**[2]

**स्त्रीणां विषये गर्वोक्तयः -**

अस्माकं वेदोपनिषदादिशास्त्रेषु स्त्रीस्वाभिमानं द्योतयन्त्यः नैकाः गर्वोक्तयः सन्ति। तत्र परिलक्ष्यते यद् भारतीयसंस्कृतौ कदापि स्त्रीणामनधिकारत्वं नासीत्। ताः सर्वदा पूज्याः आसन्।

**स्त्री सावित्री।।** (जै.उ.ब्रा. 4.27.17)

**पतयो ह्येव स्त्रियै प्रतिष्ठा।।** (श.ब्रा. 2.6.2.14)

**न वै स्त्रियं घ्नन्ति।।** (शत. 11.4.3.2)

**वरुणस्य वा एतत् स्त्री करोति यदन्यस्य सत्यन्येन चरति।।**

(शत. 2.5.2.20)

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।** (मनु. 3.56)

**यावत् जाया न विन्दते नैव तावत् प्रजायते,**
**असर्वो हि तावद् भवति।।** (शत. 4.2.1.10)

---

1. मनु. 3/114
2. मनुस्मृतिः 3/51

**स्त्रियान्तु रोचमानायां सर्वं तद्रोचते कुलम्।**
**तस्यां त्वरोचमानायां सर्वमेव न रोचते।।** (मनु. 3.62)

इत्थं समग्रशास्त्रालोचनेन वेदादिशास्त्राणाम् अध्ययनेन अवबुध्यते यद् वैदिककालादेव स्त्रीणामधिकाराः सुरक्षितः सन्ति। तत्रापि अध्ययनाध्यापनकर्मसुस्त्रीणामधिकारः वरचयन-स्याधिकारः, धार्मिककर्मणि अनुष्ठानकर्मणि वाधिकारः, युद्धकर्मणि अधिकारः, सम्पत्तेरधिकारः, मानवाधिकारः, स्वतन्त्रताया अधिकारदृशा अधिकाराः स्थालीपुलाकन्यायेन अत्र मया विवेचिताः।

**सन्दर्भग्रन्थाः** -

1. ऋग्वेदीय सूक्तसंग्रह, डा. वेदप्रकाश उपाध्याय अनुराग प्रकाशन, इलाहाबाद।
2. ऋक्सूक्तसंग्रह, कृष्ण कुमार एवं हरिदत्त शास्त्री, साहित्यभण्डार, मेरठ।
3. यास्कप्रणीतम् निरुक्तम्, कपिलदेव शास्त्री, साहित्यभण्डार मेरठ।
4. मनुस्मृतिः, कुल्लुकभट्टविरचितं टीकासहितम्, हरगोविन्दशास्त्री, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली।
5. शतपथब्राह्मण, सम्पादक - गंगाप्रसाद उपाध्याय (भाग 1 से 3)।
6. शतपथब्राह्मण (सायणभाष्यसहितम्), नाग प्रकाशन, दिल्ली
7. शतपथब्राह्मण : एक सांस्कृतिक अध्ययन, उर्मिला देवी शर्मा, मेहरचन्द लछमनदास पब्लिकेशन्स, नई दिल्ली।
8. सायणकृत अथर्ववेदभाष्य, सम्पादक-विश्वबन्धु, विश्वेश्वरानन्द वैदिक शोध संस्थानम्, होशियारपुर।
9. अथर्ववेद का सुबोधभाष्यः, पं. श्रीपाददामोदरपादसातवलेकरः पारडी।
10. महाभारत, नीलकण्ठ टीका सहित, Chirtasala Press, Poona, 1929-33

✦✦✦

# वैदिकनये पुरुषार्थप्राप्त्युपायाः

**-डा. दे. दयानाथः**
सहायकाचार्यः (सं), वेदविभागः,
राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीरपरिसरः, जम्मूः

पुरुषैः अर्थ्यते इति पुरुषार्थः। पुरुषार्थाः धर्मार्थकाममोक्षभेदेन चत्वारः सन्ति। इदन्तु परमसत्यं विद्यते यत् एतेषु चतुर्षु पुरुषार्थेषु चरमपुरुषार्थः मोक्ष एव श्रेय इति। परं मोक्षप्राप्तये धर्मार्थकामाः सहकुर्वन्ति इति निर्विवादम्। एतेषां पुरुषार्थचतुष्टयाणां प्राप्तये मनुष्यैः शास्त्रोक्तमार्गेण यतनीयः।

पुर्षार्थचतुष्टये प्रथमः धर्मः। धर्मशब्दस्य व्युत्पत्तिं नैके विद्वांसः स्वमतं प्राकटयन्। परं सामान्यतः धारणार्थकात् 'धृञ् धारणे' इत्यस्मात् धातोः निष्पन्नः शब्दः वर्तते धर्मः। धारणात् धर्म इति, ध्रियते लोक अनेन इति विभिन्नप्रकारेण धर्मशब्दस्य व्युत्पत्तिः श्रूयते। धारणार्थे उक्तम् -

**धारणाद्धर्म इत्याहुर्धर्मो धारयति प्रजाः।**
**यस्स्याद्धारणसंयुक्तः स धर्म इति निश्चयः॥**

धर्मलक्षणं विविधैः शास्त्रकारैः बहुधा प्रपञ्चितम्। तत्र मनुः धर्मलक्षणमित्थं ब्रूते-

**धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥**

**दशलक्षणानि धर्मस्य ये विप्राः समधीयते।**
**अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम्॥** (मनु. 6.92-93)

अत्र धृतिर्नाम धनादिसंक्षये सत्वाश्रय इति मेधातिथिः वदति। धीर्विद्या इत्यत्र धीः इति विद्या इति च पदद्वयं विद्येते। अत्र धीः इत्युक्ते अकार्यकरणान्निवर्तकं ज्ञानमिति, विद्या नाम आत्मज्ञानमिति च विवेकः। धृतिविषये नन्दनाचार्यः वदति यत् स्वधर्मापरित्यागः इति। इदं लक्षणं पठित्वा ये अनुतिष्ठन्ति ते मोक्षं प्राप्नुवन्ति इति वदति मनुः। अनेन इदं ज्ञायते यद् धर्मपरिपालनद्वारा मोक्षप्राप्तिरिति। मीमांसकाः धर्मलक्षणं किञ्चिदन्यप्रकारेण वदन्ति। यथा -

**चोदना लक्षणोऽर्थो धर्मः॥** इति। (मी.सू.)

मीमांसान्यायप्रकाशे आपदेवेनोक्तमिदं लक्षणम्-

**वेदेन प्रयोजनमुद्दिश्य विधीयमानः अर्थः धर्मः॥** इति (मी.न्या.प्र.)

अत्र अर्थो नाम सुखादिकं दु:खनिवारणञ्च वर्तेते। वेदेन इति पदेन लौकिकवाक्यं तृप्तिकामः भोजनं कुर्यादित्यादिवाक्यं निवारयितुम् इति प्रपञ्चितम्। वैशेषिकदर्शने प्रोक्तम् -

**यतोऽभ्युदयनिश्श्रेयः स धर्मः॥** इति। (1.1.2)

**न धर्मवृद्धेषु वयः समीक्ष्यते।** इति। (कु.सं. 5.16)

**इति महाकविकालिदासोऽपि वदति।**

यथा बौद्धिविकासाय धर्मः अपेक्ष्यते तथा शरीरपोषणार्थं अर्थोऽपि अपेक्ष्यते। स च अर्थः धर्ममार्गेण सम्पादनीयः। अत्रोच्यते श्रुतिः -

**अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम॥** (तै.सं. 1.1.)

राये धनाय सुपथा दोषरहितमार्गेण नय इति अग्निं प्रार्थयति यजमानः। एतेनापि अर्थप्राप्तिः शोभनमार्गेण कर्तव्य इति व्यज्यते। धर्ममार्गेण सम्पादिनेन अर्थेन धर्मः रक्ष्यते। उक्तं च चाणक्यनीतौ-

**वित्तेन रक्ष्यते धर्मः।** इति।। (चा.नी. 2)

सन्मार्गेणार्जितेन धनेन धर्मः रक्षणीयः इति शास्त्रसम्मतिः।

पुरुषार्थचतुष्टये तृतीयः कामः। सम्पूर्णजगतः सृष्टिरेव कामनया जातः इति वेदोक्तिः। यथा श्रूयते -

**प्रजापतिरकामयत प्रजाः सृजेय।** (तै.सं. 3.1.1)

अत्र प्रजापतिः पुरा प्रजानां सृष्टिकामनया तपः अनुष्ठितवान् इति ज्ञायते। एवमन्यत्रापि दर्शपूर्णमासयागप्रसङ्गे श्रूयते-

**प्रजापतिरकामयत दर्शपूर्णमासौ सृजेयेति॥** इति। (तै.ब्रा. 2.2.2)

महाभारते श्रूयते इत्थम्-

**द्रव्यार्थस्पर्शसंयोगे या प्रीतिरुपजायते।**
**स कामश्चित्तसंकल्पः शरीरं नास्य दृश्यते॥** (महा. आरण्य)

द्रव्यार्थस्पर्शसंयोगे या प्रीतिः जायते यथा सुवर्णादिलाभेन मनसि या प्रीतिः उत्पद्यते तादृश चित्तसङ्कल्प एव कामः इति प्रपञ्चितम्।

श्रुतावपि बहुत्र मनुष्याणां यागहोमादिद्वारा कामनापूर्तिः विहिता वर्तते। ऐश्वर्य-पशु-आयुरादीनां कामनया आहिताग्निः काम्येष्टेः अनुष्ठानं करोति। केचन काम्येष्टयः

श्रूयन्ते यथा–

**वायव्यं श्वेतमालभेत भूतिकामः॥** इति (तै.सं. 2.1.1)

अत्र भूतिकामः ऐश्वर्यकामः यजमानः वायव्यदेवताकयागः अनुष्ठेयः इति विधीयते। सत्स्वपि सहस्रसंख्याकेषु देवेषु किमर्थं वायुमेव यजेत इति शङ्का भवति। तत्रोच्यते वायोः क्षिप्रगामिदेवत्वात् श्वेतपशौ अतिप्रियत्वाच्च फलप्राप्तिरपि क्षिप्रं प्रयच्छति इति राद्धान्तः। यद्यपि अस्मिन् प्रसङ्गे यजेत इति न श्रूयते। तथापि द्रव्यदेवतात्मकस्य यागस्य श्रूयमाणत्वात् अन्यथानुपपत्त्या वायव्येन यजेत इति कल्पनीयः। उक्तञ्च आचार्यलौगाक्षिप्रणीते अर्थसङ्ग्रहे –

**देवतोद्देशेन द्रव्यत्यागः यागः॥** इति। (अर्थसङ्ग्रहः)

एवं ऐश्वर्यादिकामनापि वेदोक्तमार्गेण प्राप्तुं शक्यते।

पुरुषार्थचतुष्टये चरमः पुरुषार्थः मोक्षः। मोक्षशब्दः 'मोक्ष् मोचने' इत्यस्माद्धातोः उत्पन्नः। मोक्षो नाम न कश्चित् स्थानविशेषः। उक्तं च –

**मोक्षस्य नहि वासोऽस्ति न ग्रामान्तरमेव वा।**
**अज्ञानहृदयग्रन्थिनाशो मोक्ष इति स्मृतः॥** इति। (शिवगीता)

मोक्षोपायमार्गे वेदा एव अस्माकं परमं प्रमाणम्। मोक्षस्वरूपविषये आस्तिकदर्शनानां विभिन्नानि मतानि सन्ति। तथापि सर्वेषामपि प्रमाणं वेद एव। आत्मतत्त्वं विषयं वेदव्यतिरेकेण प्रमाणेन न लभ्यते। वेदे श्रूयते इत्थम् –

**नावेदविन्मनुते तं बृहन्तम्॥** इति (तै.का. 3.9.7)

इत्यनेन वेदव्यतिरिक्तं प्रमाणं निषिध्यते। यतो हि परब्रह्मणः स्वरूपं न प्रत्यक्षप्रमाणेन गम्यते। उक्तञ्च –

**न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैम्॥** इति।
(तै.उ. 2)

मुण्डकोपनिषदि श्रूयते –

भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।

**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥** इति। (मु.उ. 2.2.9)

वेदे मोक्षप्राप्त्यर्थं बहुत्र प्रार्थ्यते यजमानः। यथा प्रसिद्धेऽस्मिन् मन्त्रे –

**त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।**
**उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात्॥** इति। (तै.सं. 1.8.6)

यजमानः यागे प्रार्थनां करोति यदहं त्र्यम्बकप्रसादेन यथा उर्वारुकफलानि बन्धनात्

स्वयमेव मुच्यते तथाहमपि मृत्योः मोचनयुक्तो भूयासमिति। अत्र सायणाचार्यः वदति 'अमृतात् चिरजीवितात् स्वर्गाद्वा मां मुक्षीय' इति। यतो हि प्राप्तेऽपि स्वर्गे पुण्यस्य क्षयानन्तरं पुनः जन्म भवति। उक्तं च –

**क्षीणे पुण्ये मर्त्यलोकं विशन्ति॥** इति। (भ.गी. 9.2)

तैत्तिरीयोपनिषदि श्रूयते उपासनाविषये –

**स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः।**
**अमृतो हिरण्मयः। अन्तरेण तालुके। य एष स्तन इवावलम्बते।**
**सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्तते। व्यपोह्य शीर्षकपाले॥** इति।

(तै.उ. 1.6.1)

यद्यपि परमात्मनः अस्तित्वं सर्वत्र वर्तते तथापि तस्य उपलब्ध्यर्थं सुलभतया उपासनार्थञ्च उपनिषदि अस्माकं हृदयस्थानमुपदिश्यते। तदुक्तं – **अन्तर्हृदय आकाशः॥** इति। हृदयकमलमध्ये एकाग्रबुद्ध्या तं परमात्मानं साक्षात्कर्तुं प्रभवति। उक्तं च –

**दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥** इति। (कठ. 1.3)

महर्षिपतञ्जलिना यत् प्रोक्तं – **तस्य वाचकः प्रणवः॥** इति। (यो.सू. 27) तदपि वेदमूलमिति ज्ञातव्यम्। उक्तं तैत्तिरीयोपनिषदि –

**ओमिति ब्रह्म। ओमितीदं सर्वम्॥** इति (तै.उ. 1.7.1)

अत्र इतिशब्देन इदमुच्यते यद् ओमित्येकाक्षरेणैव ब्रह उपास्य इति। ओङ्कार-मुच्चारयन् ब्रह्मोपासीत इत्यर्थः। अग्रे उच्यते – ब्रह्मैवोपाप्नोति। (तै.उ. 1.7.1) इति। अर्थात् ओमित्यनेन शब्देन यः पुमान् ब्रह्म उपासते सः ब्रह्मसायुज्यं प्राप्नोत्येव इति वेदः निगमयति।

वस्तुतः मनुष्यजन्म परमात्मनः प्रसादात् लभ्यते। अस्मिन् एव जन्मनि मनुष्याः धर्मार्थकाममोक्षरूपाः चतुर्वर्गपुरुषार्थाः लभ्यन्ते। मनुष्याः धर्मार्थकामानां विधिवदनुष्ठानेन मोक्षः लभ्यते। यागादीनामनुष्ठानेन चित्तशुद्धिद्वारा एव मोक्षः सिद्ध्यति। धीशुद्ध्या विविदिषोत्पादनद्वारा ब्रहज्ञानहेतुत्वात् कर्मानुष्ठानं कर्तव्यम्। तदुक्तम् – **तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन॥** इति। धर्माचरणेन अनुक्तमपि स्वर्गादिफलं लभ्यत एव। तदुक्तम् आपस्तम्बेन – **तद्यथा आम्रे फलार्थे निर्मिते छायागन्धावनूत्पद्येते, एवं धर्ममपि चर्यमाणमर्था अनूत्पद्यन्ते** इति आपस्तम्बधर्मसूत्रम्। इत्थं चतुर्वर्गपुरुषार्थप्राप्त्युपायाः वेदे विहिताः इति शम्।

✦✦✦

# यजुर्वेदीयस्वरसञ्चालन विधिः

**डॉ. शैलेन्द्र प्रसाद उनियालः**
सहायकाचार्यः, वेद विभागः

**माध्यन्दिनशाखायाः विसर्गादिस्थलविशेषेषु हस्तस्वरनिर्देशः**

तपःपूतान्तःकरणैः ज्ञातकर्मरहस्यैः महतः कष्टाँश्च सोढ्वा मन्त्रब्राह्मणारण्यकोपनिषदां कण्ठपाठैः रक्षितेयंपरम्परा। यावन्तं वेदसाहित्यं वयं पश्यामस्तत्रपूर्वजानां पुरोवर्त्मनां महात्मनां साधकानां सिद्धानामाचार्यवेदविदुषां[1] दाद्याद्यं प्रसादं दायित्वं चाग्रे प्रचारप्रसारणार्थम्। एवं हि हृदि विचार्याद्य प्रवृत्तोऽहमस्मिन् शुचिरुचियुक्तकर्मणि। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, तस्मात् वेदपाठे उदात्तानुदात्तस्वरितैः सह हस्तमुद्रादेश्च सम्यग्बोधाय सचित्रं सप्रमाणञ्च प्रदर्श्यते स्वरसञ्चालनपरम्परा[2]–

1. **सुप्रसन्न मना भूत्वा किञ्चिन्नम्रस्त्वधोमुखः।**
   **निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्।।**[3]
2. **सुप्रसन्नमनाभूत्वा विनीतः स्वासनं भजेत्।**
   **निवेश्य दृष्टिं हस्ताग्रे वेदं स्वीयं समभ्यसेत्।।**[4]
3. **'स्नानाचमनादिभिः शौचयुक्तेन ब्रह्मचर्यवता**
   **त्रैवर्णिकेन स्वाध्यायोऽध्येतव्य'**[5]

अथ वेदाध्ययनार्थं पादशुध्याचमनादिना[6] शुचिर्भूत्वा[7] शुचिप्रदेशे सुखदासने समुपविश्यसुसमये रात्र्याश्चतुर्थप्रहरेऽध्येतव्यम् शुचिताभावे स्थानस्यात्मनोवानध्यायः स्वाध्यायं वर्जयेत्।[8]

**स्वरो हस्तेन देयो वै मुद्रा फणिफणाकृतिः।**
**पितृतीर्थाद्भवेन्निम्नः सुव्यक्ताङ्गुलिरञ्जितम्।।**[9]

सर्पफणाकृतिवद्धस्तः पितृतीर्थो निम्नंगतः सुव्यक्ताङ्गुलिभिः रञ्जितम्, भवेत् मोक्षणं वेति गोकर्णाकृतिवत् केचित् एवं वदन्ति।

**स्वरसञ्चालनार्थं हस्तस्थितिः**



**चित्रसंख्या [ 1 ] हस्तस्थितिः**

ऋग्वेदस्य[10] क्वचित् क्षेत्रीयविद्वांसः हस्तेन स्वरसञ्चालनं कुर्वन्ति। शुक्लयजुर्वेदे च हस्तेनैव स्वरसञ्चालनं क्रियते। कृष्णयजुर्वेदे कण्ठस्वरः। सामवेदेऽङ्गुल्या स्वरसञ्चारः। अथर्ववेदे केचित् स्वरसञ्चालनं कुर्वन्ति केचिन्न। हस्तेन विना ये पाठं कुर्वन्ति तत्र फलोदयाभावः प्रत्यवाय एव श्रूयते।

**वेदारम्भे हरिः शब्दः पदवत् पठ्यते यदि।**
**आद्युदात्तः प्रयुज्येत स्वरितान्त इति स्फुटम्॥**[11]

हरिं ॐ अत्र निश्चिह्नः हकार उदात्तः उपरि भ्रुवः प्रान्तगः चित्रे प्रदर्श्यते।



**चित्रसंख्या [ 2 ] उदात्तः**

'रिं' इत्यत्र स्वरितः ऊर्ध्वरेखाङ्कितः उपरितः मध्ये हस्तः आगत्य तिष्ठति।

**उर्ध्वरेखा तु वर्णस्य शिरोमात्रोपरिस्थिता।**
**उभयवास्वरितो ज्ञातः विद्वद्भिर्वेदपारगैः॥**[12]



**चित्रसंख्या [ 3 ] स्वरितः**

**तिर्यग्रेखा गकारेऽधः सानुदात्तस्य ज्ञापिका।**
**मन्यते ज्ञायते चैव वैदिकैः वेदपाठिभिः॥**[14]

गकारे अधोऽङ्कितरेखया अनुदात्तेऽत्र हस्तः शास्त्रोदितं हृदि गमिष्यति परञ्च अभ्यासार्थे परम्परासु नाभेः समक्षे पादतः किञ्चिदुपरि नीत्वा अभ्यासः क्रियते। यथा–'गणानान्त्वा' (शु. य. सं. 23/19)



**चित्रसंख्या [ 4 ] अनुदात्तः**

चत्वारस्तिर्यक् स्वरिताः। अनुदात्तं चेत् तिर्यङ् निहत्यकाण्वस्य। यजुं निहत्य प्रणिहन्यते उदात्ते। (वा. प्रा. 1/122-124)

1. ‘व्वैष्णव्यौ’ (वा. सं. 1/12) इति जात्यः।
2. ‘व्वेदोऽसि’ (वा. सं. 2/21) इत्यभिनिहितः।
3. अभ्यर्षत (वा. सं. 17/98) क्षैप्रः।
4. अभीन्धतामुखे (वा. सं. 11/61) प्रश्लिष्टः।

एतेषु चतुर्षु हस्तः हृदयं प्रति गत्वा बहिरायाति चित्रत्रयेन अयं भागः प्रदर्श्यते। एते चत्वारः उदात्त परत्वाभावात् अर्धन्युब्जाः भवन्ति।



**चित्रसंख्या [ 5, क ]**



**चित्रसंख्या [ 5, ख ]**



**चित्रसंख्या [ 5, ग ]**

उदात्तपरभूते यथा–'भूर्भुवः स्वर्द्यौरिव' इति जात्यः। (वा. सं. 3/5)

'प्रसवेऽश्विनोर्बाहुभ्याम्' (वा. सं. 1/10) इति अभिनिहितः

'विश्वन्यत्रिणम्' (वा. सं. 17/16) इति क्षैप्रः।

'स्रुचीवेति' (वा. सं. 20/79) इति प्रश्लिष्टः

एते अनुदात्तपूर्वा उदात्तपराः सन्तः पूर्णन्युब्जाः भवन्ति।



**चित्रसंख्या [ 6, क ] पूर्वस्थितिः**



**चित्रसंख्या [ 6, ख ] उत्तरस्थितिः**

सम्प्रदायप्रबोधिनीशिक्षायां स्वरितस्य पञ्च भेदा दशमे पृष्ठे दर्शिताः। प्रथमो मध्यपाती (नां), द्वितीयः - मध्यदर्शी (गुणपतिं ॳ हवामहे) तृतीयः मध्यावर्त्ती (अथवा 4) चिह्नवान्, 'अत्र पूर्वेऽनुदात्ताङ्के वर्णे मध्ये भवेद्भ्रमिः मध्यावर्त्ते भ्रमेर्बाह्यं प्रापयेत् स्वरिते करम्।' एवं हि श्रीअमरनाथशास्त्रिकृतव्याख्यायां हस्तसञ्चालनविधौ[15] 'तिर्यग्जात्यादिरीरितः'[16] इत्यस्य जात्याऽभिनिहितक्षैप्र प्रश्लिष्टाश्च चत्वारः अनुदात्तात्पराः तिर्यक् यद्युदात्तः परो न भवति तदा एते पितृपिण्डप्रदानमुद्रावत् दक्षिणतः अर्धन्युब्ज हस्तं कृत्वा च स्वरणीयाः।

इदानीमर्धन्युब्जस्थले 'अनुदात्तं चेत् पूर्वं तिर्यङ्निहत्य काण्वस्य'[17] इति प्रातिशाख्यात् प्राप्तं यत् पितृतीर्थनिम्नीकरणं तत्रान्तराले मानविशेषमाह। अत्रायं विवेकः अर्धन्युब्जस्थले मूलस्थानस्थितं हस्तं पितृतीर्थतः सार्धाङ्गुलान्तरालं नमनेन जातमर्धन्युब्जम्। ततो हृदयं यावत् षडङ्गुलान्तरं मण्डलाकारं संचाल्य पुनः मूलस्थानं प्रापयेत्। तदेवार्धन्युब्जता जात्यादीनामनुदात्तपूर्वाणाम्। यद्येतेभ्यः परः उदात्तो भवेत्तदा तु तिर्यङ् निहननं पितृतीर्थ-निम्नीकरणात्मकमपोह्य 'ऋजुं निहत्य प्रणिहन्यते उदात्ते'[18] इति ऋजुनिघातविधायक-प्रातिशाख्यवचनात् उत्तानमेव हस्तं पूर्वं मूलस्थानतो हृत्संनिकृष्टम् अवतार्य पुनः षडङ्गुलान्तरालात्मके मध्ये प्रत्यावृत्य च प्रणिहन्यते पूर्वं ऋजुत्वाख्यानात् सम्प्रति न्युब्जता सूचिता। प्रणिहन्यत इति प्रोपसर्जनाच्च पूर्णता द्योत्यते। अतएव मनुष्यतीर्थेन नीची क्रियते अत्र विशेषं परम्परासिद्धं तथ्यं पूर्णन्युब्जे पितृपिण्डप्रदानवद्धस्तं निनाय पुनः मनुष्यतीर्थनिनायनं भवति इति। यश्च मध्यावर्ती प्रोक्तः सम्प्रदायप्रबोधिनीशिक्षाया-मेवात्रार्धन्युब्जः पूर्णन्युब्जश्च द्विधा भवति विवेकः। अतोमेऽत्र परम्परया शास्त्रसिद्धञ्च तथ्यं प्रमाणमुपरि अमरनाथशास्त्रिणां प्रातिशाख्यसम्मतं प्रदत्तम्।

**मुष्ट्याकृतिर्मकारे स्यान्नकारे तु नखग्रहः**[19]

दशाङ्गुलम् (वा. सं. 31/1)



**चित्रसंख्या [ 7, क ]**

भाव्यम् (वा. सं. 31/2)



**चित्रसंख्या [ 7, ख ]**

गर्भ॒धम् (वा. सं. 23/19)



**चित्रसंख्या [ 7, ग ]**

अक॑ल्पयन् (वा. सं. 31/13), प्रथमान्यासन् (वा. सं. 31/16)



**चित्रसंख्या [ 7, घ ] नखस्पर्शः**

तर्जन्या अङ्गुष्ठस्य नखस्पर्शः भवेत्।

**ककारान्ते टकारान्ते ङणे तर्जनिकां नमेत्।**
**पञ्चाङ्गुल्यं पकारे च तकारे कुण्डलाकृतिः॥**[20]

उपर्युक्तश्लोके ककारे, ङकारे, टकारे, णकारे, तकारे च तर्जनिकां नामयन्ति, पकारे पञ्चाङ्गुलिसंयोगः तकारे च कुण्डलाकृतिः भवति, तच्चित्रे प्रदर्श्यते।

अध्व॑र्वो. भि॒षक् (वा. सं. 16/5)

सु॒ꣳस्र॒व. व्वाट् (वा. सं. 2/18)

ङणयोरुदाहरणे पदपाठतो बोध्यौ

यथा-'द॒ध्यङ्' (वा. सं. 11/33)

'वृ॒ष॒ण्ण्व॒सू॒ऽइति॒वृषण्' (वा. सं. 11/13)



**चित्रसंख्या [ 8, क ]**



**चित्रसंख्या [ 8, ख ] तर्जन्यङ्गुष्ठमेलनात् ꣳकारः**

'गा॒य॒त्री त्रि॒ष्टुप्' (वा. सं. 23/33) पकारे पञ्चाङ्गुलीनां मेलनम्।



**चित्रसंख्या [ 8, ग ]**

स॒ह॒स्र॑पात् (वा. सं. 31/1)



**चित्रसंख्या [ 8, घ ]**

तर्जन्यङ्गुष्ठयोरग्रमेलनात् तकारे कुण्डलाकृतिः भवति।

**ऊर्ध्वरेफ समाना या बिन्दुमध्ये स्थिततराम्।**
**तर्जनीक्षेपिकां तत्रोदात्ताच्चोष्मादयो यतः॥7॥** (अमरना.शा.)

उदाहरणम्-सहस्राक्षः। (वा. सं. 31/1)



**चित्रसंख्या [ 9 ] उदात्तविसर्गः वामपार्श्वे**

वामपर्श्वे तर्जनीक्षेपोऽत्र भवति।

अद्भ्यः (वा. स. 31/17) मन्त्रेऽस्मिन्नुपरि भ्रुवः प्रान्ते तर्जन्याः प्रसारः। एवं हि दीर्घगूँकारे तर्जन्या प्रसारः यथा-अभित्यं देव संविता (वा. सं. 4/25)



**चित्रसंख्या [ 10 ]**

**रेखाबिन्दु द्वयस्यान्तरधोरेफसमा च या।**
**बलिकां तत्र जानीयात् कनिष्ठायाश्च क्षेपणम्।।**[21]

पुरु॑षः (वा. सं. 31/1) मध्ये मूलस्थाने हस्तः।



**चित्रसंख्या [ 11, क ]**

तस्मा॑द्यज्ञात्स॑र्व॒हु॒तः। (वा. सं. 31/6) अनुदात्तेऽधः कनिष्ठायाः प्रसारः।



**चित्रसंख्या [ 11, ख ]**

प॒द्भ्यां भूमि॒र्दिश॒ः (वा. सं. 31/13) अनुदात्तदक्षिणे कनिष्ठायाः प्रसारः।



**चित्रसंख्या [ 11, ग ]**

**ऊर्ध्वबिन्दुद्वयस्यान्तस्तिर्यग्रेरखा तु या स्थिता।**
**उभक्षेपस्वरं तत्र स्वरतत्त्व विदोविदुः॥**

यत्र ÷ एवम्प्रकारकः स्वरितो भवति तत्र तर्जनीकनिष्ठयोः द्वयोः प्रसारो भवति।

दे॒वोव॑ ÷ (वा. सं. 1/1)

सु॒क्रतु॑ ÷ कृ॒पास्व॑ ÷ (वा. सं. 4/25)



**चित्रसंख्या [ 12 ] उभयक्षेपः**

अथ वर्जितमुद्राणामुदाहरणानि

**चुलनौका स्फुटो दण्डः स्वस्तिको मुष्टिकाकृतिः।**
**एते वै हस्तदोषाः स्युः परशुश्चैव सप्तमः॥**[22]

तथा च सम्प्रदायप्रबोधिनी शिक्षाकारेण तथाङ्गुल्याः प्रदर्शनम्' इति पाठः वर्द्धितः तस्मात् अष्टौ दोषाः हस्तस्यावश्यमेव वर्जनीयाः तेषां मुद्राः चित्रेण साकं प्रदर्श्यन्ते-



**चित्रसंख्या [ 13, क ] हस्तदोषः चुलुः**



**चित्रसंख्या [ 13, ख ] हस्तदोषः नौका**



चित्रसंख्या [ 13, ग ] हस्तदोषः स्फुटः



चित्रसंख्या [ 13, घ ] हस्तदोषः दण्डः



चित्रसंख्या [ 13, ङ ] हस्तदोषः स्वस्तिकः



चित्रसंख्या [ 13, च ] हस्तदोषः मुष्टिः



चित्रसंख्या [ 13, छ ] हस्तदोषः परशुः



चित्रसंख्या [ 13, ज ] हस्तदोषः अङ्गुलीप्रदर्शनम्

1. पदक्रमविशेषज्ञो वर्णक्रमविचक्षण:।
   स्वरमात्राविभागज्ञो गच्छेदाचार्यसम्पदम्।। तै. प्रा. 24/6
2. उपनीय तु य: शिष्यं वेदमध्यापयेद् द्विज:।
   सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते।। मनु.
3. या. शि. 2/21
4. सं. प्र. शि. 6
5. वा. प्रा. 8/27
6. प्रयत: (वा. प्र. 1/20)
7. शुचौ 1/21
   द्वावेतौ वर्जयेन्नित्यमनध्याये प्रयत्नत:।
   स्वाध्यायभूमिं चाशुद्धामात्मानञ्चाशुचिं द्विज:।। अनन्त:, उव्वटश्च
8. आसनं स्वस्तिकं पद्मं बद्धोरौ दक्षिणे करम्।
   सव्यं समुष्टिं च विन्यस्य मुष्टौ दक्षिणकूर्परम्।। सं. प्र. शि.
   हस्तौ सुसंयतौ धार्यौ जाननोरुपरि स्थितौ।
   गुरोरनुमतिं कुर्यात् पठन्नान्य मतिर्भवेत्।।
   ऊरुभागेतृतीये तु कूर्परं न्यस्य दक्षिणम्।। वा. शि. 19,20
9. स्व-रचित:
10. ऋचोयजूँषि सामानि हस्तहीनानि य: पठेत्।
    अनृचाो ब्राह्मणस्तावत् यावत् स्वारं न विन्दति।।
    हस्तहीनं तु योऽधीते स्वरवर्ण विवर्जितम्।
    ऋग्यजु: सामभिर्दग्धो वियोनिमधिगच्छति।।
11. सं. प्र. शि. 27
12. स्वरचित-श्लोक:
13. वा. सं. 23/19
14. स्वरचित-श्लोक:
15. सं. प्र. शि. 55
16. या. शि. 55-59
17. वा. प्र. 1/23
18. वा. प्रा. 1/224
19. या. शि. 61
20. या. शि. 62
21. या. शि. व्या. अ. ना. शा
22. वा. शि. 44

✦✦✦

# वेदस्मृत्योरन्तस्सम्बन्धः

**-डॉ. इतिश्री महापात्रः**

अनुबन्धाध्यापिका (धर्मशास्त्रम्)

राष्ट्रियसंस्कृतसंस्थानम्, अगरतला

'विद्' धातोः घञ् प्रत्यये वेदशब्दः निष्पन्नो भवति। यस्यार्थो भवति ज्ञानम्। सायणस्तु "अपौरूषेयं वाक्यं वेदः" इत्याह। इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स 'वेद' इति भाष्यभुमिकायामुक्तम्। आम्नायः, आगमः, श्रुतिः, वेदः इति सर्वे शब्दा परस्परंपर्यायाः सिद्धान्तकौमुद्यांचुरादिप्रकरणे चतुर्ष्वर्थेषु विद्धातोः प्रयोगोऽस्ति।

**सत्तायां विद्यते ज्ञाने वेत्तिविन्ते विचारणे।**
**विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नमशेष्विदं क्रमात्॥**

क. विद्यते सतां गृहणाति वस्तु अनेन इति वेदः।

ख. विद्यन्तेभिः धर्मब्रह्मणी क्रियाज्ञानमयं ब्रह्म वा इति वेदः।

ग. विन्ते विचारयति धर्मब्रह्मणी क्रियाज्ञानमयं ब्रह्मवेति वेदः।

घ. विदन्ते स्वरूपं लभन्ते वस्तु अनेनेति वेदः।

ङ. विदन्ति, जानन्ति, भवन्ति, विन्ते, विचारयति, विदन्ते, लभन्ते सर्वे मनुष्याः सत्वविद्या येर्थेषु वा तथा विद्वांसश्च भवन्ति ते वेदाः।

च. मन्त्रब्राह्मणयोर्वेदनामधेयम्।

अयं वेदः नित्यो भवति। यतोहि एषः केनापि पुरूषविशेषेण न कृतः। वेदस्य मौखिकः स्वरूपः प्रथमतथा प्रायतः ख्री.पु 2500 तः ख्री.पु 1500 मध्ये भवेदिति मन्यते। एवं ख्री.पु 1500 तः ख्री.पु 1000 पर्यन्तं सप्तसिन्धौ वेदस्य रचनाऽभूदिति मन्यते[1]। प्रारम्भतः वेदः ऋग्यजुः सामभेदेन त्रिविध आसीदिति। अथर्ववेदस्तु अनन्तरं संयोजितः। एवं भावेन वेद चतुर्धा भवति। एतेष्वपि ऋग्वेदः प्रप्रथमो वर्तते इति सर्वैः निश्चप्रचमङ्गीक्रियते। 'प्रयोगकालीनसमवेतार्थस्मारको भवति मन्त्रः'। यज्ञानुष्ठानानां विस्तारवर्णनं ब्राह्मणभागे दरीदृश्यते। मन्त्रसमुदायः भवति संहिता। अतः 'मन्त्रसमुच्चयः संहिता' इति कथ्यते।

---

1. वै.वाङ्. इति. पृ. 1-18

तत्र संहिता: ऋग्यजुस्सामाथर्वभेदैः चतस्रः भवन्ति। एतासां संहितानां संकलनं महर्षिः वेदव्यासः यज्ञाविधानार्थं कृतवान्।

(1) ऋग्वेद: – 'ऋच्यन्ते स्तुयन्ते देवा अनया इति ऋक्'[1]।

(2) यजुर्वेद: – 'अनियताक्षरावसनो यजुः'। आध्वर्युकर्मसंपादनाय यजुषां संकलनं यत्र विद्यते सःयजुर्वेदः।

(3) सामवेद: – 'गीतिरूपा मन्त्राः सामानि' साम इत्युक्ते 'तया सह सम्बन्धः अमो नाम स्वरः यत्र वर्त्तते तत्साम' इति कथ्यते।

(4) अथर्ववेद: अभिचार क्रियायाः प्राधान्येन प्रतिपादकोऽयं वेदः।

अथर्वनामकेन ऋषिणा दृष्टत्वात् अथर्ववेद इत्युच्यते।

यज्ञानुष्ठानार्थं चतुर्णा वेदानां चत्वारः ऋत्विजाः प्रकल्पिताः। यथा– ऋक्वेदस्य होता, यजुर्वेदस्य अध्वर्युः, सामवेदस्योद्गाता, अथर्ववेदस्य ब्रह्मा भवन्ति।

उपनिषद् – वेदस्यान्तिमभागो भवति उपनिषत्, यस्तु वेदान्त इति कथ्यते।

अत्र प्रमुखतया ब्रह्म–आत्मा–परमात्मा–माया–जगत्–पुनर्जन्मादि विषयाः विचार्यन्ते।

प्रमुखतः संस्कृतसाहित्ये प्रामुख्येन दशोपनिषदस्समुपलभ्यन्ते। तद्यथा–

**"इशकेन कठ प्रश्न मुण्ड माण्डुक्य तित्तिरः**
**ऐतरेयं च छान्दोग्यं वृहदारण्यकं दशः॥ इति॥**

एतेष्वपि मुख्योऽपनिषत् भवति वृहदारण्यकोपनिषत्।

तथैव वेदोक्तविषयाणां विभागशः ज्ञानार्थं वेदाङ्गान्युपकल्पितानि महार्षभिः वेदाङ्गानि–वेदस्य सहायकभूतानि षड् अङ्गानि भवन्ति।[2]

यथा–

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**

**शिक्षाघ्राणं तु वेदस्य मुखं व्याकारणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**

श्रुतिः भवति वेदः स्मृतिः भवति धर्मशास्त्रम्। ध्रीयते लोक अनेन इति धर्मः, धरति धारयति वा लोकमिति धर्मः, ध्रियते लोकः यात्रानिर्वाहार्थं वेति धर्मः, धृञ् धारणपोषणयोरित्यस्माद्धातोः मन् प्रत्ययेकृते धर्मः, 'शास्'धातोः राष्ट्र प्रत्यये कृते च

---

1. वै.सा.इति, पृ.52
2. पाणिनीयशिक्षायां (41–42) प्राप्यते।

शास्त्रमिति पदं निष्पद्यते। धर्मं शास्तीति व्युत्पत्या धर्मशास्त्रपदं सिद्धयति।" धर्मशास्त्रं नाम सकलशास्त्रपुरस्कृतं निखिललोकसुरक्षकं कृत्याकृत्यप्रतिपादकत्वेन नित्यनियतोपादेयं साक्षात् वेदार्थानुमापकत्वेन वेदवत्प्रमाणं तपः स्वाध्यायपूतचरित्राणां यमनियमानुष्ठानप्रयतात्मनां सकलसंस्कारसंस्कृतानाम् आत्मगुणविद्योतितान्तः करणानां ब्रह्मादिस्तम्भपर्यन्तसक्लभुतहिता कांक्षिणां रागद्वेषरहितानां मनुगौतमवसिष्ठादिमहर्षीणां निरतस्वध्यायध्ययनपूतकष्ठोद्‌गीर्णत्वेन सर्वजनग्रहणीयं गुणिगणसमादरणीयं प्राचीनतमं शास्त्रम्"[1]। अतःव्यवहारविधायकस्य धर्मविधायकस्य च शास्त्रस्य नाम धर्मशास्त्रमिति। धर्मशास्त्रस्य अन्यनाम भवति स्मृतिः। उक्तं मनुना "श्रुतिस्तु वेद विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः"[2]।

धर्मशास्त्रे मुख्यतः षडविधाः धर्माः विचार्यन्ते। ते समार्त्तधर्माः यथा-[3]

(1) वर्णधर्मः (2) आश्रमधर्मः (3) वर्णाश्रमधर्मः (4) गुणधर्मः (5) निमित्तधर्म (6) साधारणधर्म श्चेति। एतद्धर्मशास्त्रं हिन्दु-सनातन-धर्मस्य मुख्याङ्ग भवति। अत्र विशेषतः आचारः, व्यवहारः, प्रायश्चित्तभेदैः त्रयः विषयाः पर्यालोच्यन्ते।

यतः उपनिषदारण्यक-वेदाङ्ग-पुराण-धर्मशास्त्रादिषु प्रतिपादितानां विषयाणां बीजं वेदेषुएव निक्षिप्तं वर्तते इति हेतोः वैदिक लौकिकशास्त्राणां परस्परं अन्योन्याश्रयसमम्बन्धः वर्तते। धर्म व्यवस्थापकत्वेन वेदः आद्रियते धर्मप्रतिपादकत्वेन च स्मृतिः स्वीक्रियते अर्थात् वेदेषु साङ्केतिकरुपेण गूढरूपेण च या धर्मव्यवस्था प्रदर्शितास्ति तस्या एव व्यवस्थायाः लोके सर्वत्र सर्वेषां वर्णानां च कृते आचरणाय स्मृत्यादिषु लौकिकरूपेण अर्थात् लौकिकसंस्कृतभाषया सरलपद्धत्या च स्मृतिकारैः वर्णनं विहितम् यथा-धर्मविषये स्मृतिषु बहुधा प्रतिपादितमऽस्ति किन्तु तस्य धर्मस्य बीजं वेदेषु एवं दृश्यते।

यथा -

आ प्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे। ऋ.वे.[4]

धर्मणा मित्रावरणा विपश्चिता व्रता रक्षेथे असुरस्य मायया। ऋ.वे.[5]

द्यावा पृथिवी वरूणस्य धर्मणा विष्कमिते अजरे भूरि रेतसा। ऋग्वेद[6]

अचित्ती यत्प व धर्मा युथोपिम मा नस्तस्मादेनसो देव रीरिषः। ऋग्वेद[7]

---

1. ध.शा.को.मुखबन्ध, पृ-1
2. मनु.स्मृ. 2/10
3. याज्ञ.स्मृ. पृ. 1
4. ऋ.वे. 4/53/3
5. ऋ.वे. 5/63/7
6. ऋ.वे. 7/89/5
7. ऋ.वे. 7/89/5

अत्र धर्मः नियमस्य व्यवस्थाया वा द्योतको अस्ति। एतेभ्यः वेद मन्त्रेभ्यः आचरणं नियमोऽपि प्रकाश्यते। वेदेषु धर्मस्यार्थरूपेण धार्मिकविधिः धार्मिकक्रिया-निश्चित्तनियम-शिष्टाचारप्रभृतयः शब्दाः नियुक्ताः सन्ति। परन्तु उपनिषत्साहित्येषु वेदार्थातिरिक्ताः धर्मशब्दस्यार्था अपि वर्त्तन्ते। तत्र प्रथमतः छन्दोग्योपनिषदि वर्णा वर्णाश्रमधर्मस्यार्थत्वेन धर्मः प्रयुक्तः। अत्र धर्मनाम्ना वर्णानामाश्रमाणां चाचारा उक्ताः तैत्रिरीयोपनिषदनुसारं पठनोपरान्तं गुरूमाध्यमेनैव सत्यंवद, धर्मं चर, चेतीयं शिक्षा प्रदीयते।

अथर्ववेदस्य ऋचासु धर्मशब्दस्य प्रयोगः धार्मिक संस्कारेभ्यः अर्चित गुणानाम्मर्थे प्रयुक्तः अर्थात् धर्मस्यार्थः पुण्यफलप्राप्तिरिति तथाहि-[1]

**ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च।**
**भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं जले॥**

एतरेयब्राह्मणेऽपि धर्मशब्दः समस्तधार्मिक कर्त्तव्यानाम अर्थे प्रयुक्तो विद्यते।[2]

धर्मस्य गोप्ता जनीति तमभ्युत्क्रुष्टमेवं विदभिवेक्ष्यन्नेतयर्चाभिमन्त्रयेत

अत्र यथा एकस्याम् एकस्यां ऋचायां धर्मः सूत्ररूपेण व्यञ्जयितः तथा स्मृतिषु धर्मः सूक्ष्मरूपेण न प्रतिपादितः अपितु तस्य विशदं विवेचनं तत्र तैः कृतम्। यथा महर्षिणा पाणिनीना चतुर्दशमाहेश्वराणिसुत्राणि एव अष्टाध्याम् किञ्चित् विस्तारंकृत्वा कथितानि, अनन्तरं च तानिसूत्राणि अधिकृत्य विशालं व्याकरणशास्त्रं लोके आगतम् तथैव वेदोक्त सूत्रात्मकाः मन्त्रात्मकाः वा विषयाः स्मृतिषु विशदरुपेण साधारणजनकल्याणाय स्मृतिकारैः व्याख्यायिताः। चतुर्षु वेदेषु उपर्युक्त धर्मविषयाः साकेंतिकाः सूत्रात्मकाः सन्ति किन्तु एष विषयः स्मृतिषु दैर्घ्यं प्राप्तः इति स्मृतिनामवलोकनेन सुस्पष्टी भवति।

गौतमधर्मसूत्रस्य प्रथमें सुत्रे एवा चार्येण धर्मस्य मूलत्वेन वेदाः स्वीकृताः तद्यथा- "ॐ वेदो धर्ममूलम्"[3]। सूत्रस्यास्याऽयमर्थोऽस्ति यत् चत्वारोवेदाः धर्मस्यमूल-प्रमाणत्वेनाङ्गीक्रियन्तेति। द्वितीयसूत्रं-"तद्वितां च स्मृतिशीले"[4]। अर्थात् वेदेस्य ज्ञाता मनु आदि स्मृतिनाम् तथा धर्मानुकूल आचरणम् प्रमाणम्। मन्वादीनाम् स्मृतिकाराणां स्मृतयः वेदस्य एव प्रमाणमावहन्ति यतः ते स्वयं वेदविज्ञः आसन्, अतएव तेषाम् धर्मानुकूलमाचरणम् अपि तत्र प्रमाणमस्ति। एतस्याऽयं भावोऽस्ति यत् मन्वादिभिः यत् यत् आचरितं, स्मृतिषु भणितं च तत् सर्वमपि वेदोक्तमेव। अत्र केवलं शब्दभेदः

---

1. अथर्व.वे. 11/9/14
2. ऐ.ब्रा.8/17
3. गौ.ध.सू-1/1/1
4. गौ.ध.सू-1/1/2

नत्वर्थभेदेति।

आपस्तम्ब-धर्मसूत्रकारोऽपि लिखितवान्-"धर्मज्ञ समयः प्रमाणम, वेदश्च"[1] अर्थात् यः धर्मजानति, अर्थात् धर्मविदां वेदमर्मज्ञानाम् च मतमेव वेदस्यप्रमाणोऽस्ति।

वसिष्ठधर्मसूत्रेऽपि लिखितमस्ति यत् श्रुति स्मृतिभ्यां विहिताचरणं नियमश्च धर्मे वर्त्तते।[2]

**मनुना उक्तं धर्मप्रमाणम्-[3]**

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥**

ऋग्यजुः सामाऽथर्वलक्षणौ वेदो धर्मे मूलप्रमाणम्। मन्वादीनां च वेदविदां च वेदविदां स्मृतिः धर्मे प्रमाणम्। शीलं ब्रह्मण्यतादिरूपरागद्वेषपरित्यागात्मकं, तदपि धर्मे प्रमाणम्। तदाहहारीतः[4] "ब्रह्मण्यता देवपितृभक्तता सौम्यता अपरोपतापिता अनसूयता मृदुता अपौरूष्यं मैत्रता प्रियवादित्वां कृतज्ञता शरण्यताकारूण्यं प्रशान्तिश्चति त्रयोदशविधं शीलम्"। साधुनामाचारः आत्मतुष्टिषश्च धर्मे प्रमाणाम्। योगीश्वरेण उक्तम्-[5]

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**सम्यक् संक्ल्पजः कामो धर्ममूलमिदं स्मृतम्॥ 1/7॥**

याज्ञवल्क्यः वदति यत् धर्मस्य पञ्च उपादानानि भवन्ति।

इत्थमस्मभिः ज्ञायते यत् स्मृतिषु यत् किमपि उक्तमस्ति तस्य आधारः वेदएव। वेदो भवति धर्मस्य स्रष्टा। वेदेष्वेव सर्वत्र धर्मशब्दस्य प्रयोगो विभिन्नेष्वर्थेषु जातः। विश्वमानवसभ्यतायाः संस्कृतेः सदाचारस्य धर्मस्य च परमप्राचीनतममूलग्रन्थो वेदः। ब्रह्मणोऽस्य मुखमासीत् इत्यादिवेदादेव चातुर्वर्ण्यं प्रसिद्धयति। ब्राह्मणीभूतमातापितृजनितत्वमिति तदुपजीवितया स्वर्गादिलोकोऽपि वेदादेव प्रसिद्धः। एवं ब्रह्मचर्याद्याश्रमा अपि चत्वारो वेदमूलकत्वाद्वेदादेव प्रसिद्धयति। किं बहुना, यत्किञ्चिदतीवं वर्त्तमानं भविष्यं च तत्सर्वं 'अग्नौ प्रत्याहुतिः सम्यग्' इत्यादिन्यायेन वेदादेव प्रसिद्धयति। यथाह मनुः-[6]

**चातुर्वर्ण्यं त्रयो लोकाश्चत्वार आश्रमाः पृथक्।**
**भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिद्धयति॥**

1. आ.ध.सू-1/1/2,3
2. व.ध.सू
3. मनु.स्मृ. 2/6
4. हारितः स्मृतिः
5. याज्ञ.स्मृ 1/7
6. मनु.स्मृ 12/97

अत: धर्मविषये परमं च प्रमाणं वेद एव। 'शतायुर्वैपुरूष:' इति श्रुतिवचनानुसारं मानवजीवनं शतवार्षिकमिति पुरालोकधारणास्ति, तर्हि तेषां दीर्घजीवनं न केबलमाधिभौतिकेन संग्रहेण अपि तु धर्मभावेनाधिकमानन्दं प्राप्नोति। मानवो सर्वदा धर्ममाध्यमेन आत्मन: सर्वोच्चसुखमभ्युदयं च साधयति।

एवं विविधाभि: युक्तिभि: वेदोक्त मन्त्रै: स्मृतिषूक्त विधानैश्च वेदस्मृत्यो: परस्परं सम्बन्ध: स्वत: एव सिध्यतीति शम्।

✦✦✦

# संकेतग्रहस्वरूपविमर्शः

## ( न्यायसाहित्यव्याकरणमीमांसाबौद्धदृष्ट्या )

**-हरीशबहुगुणा**

शोधच्छात्रः (विद्यावारिधिः) (न्यायवैशेषिकविभागः)

श्रीलालबहदुरशास्त्रीराष्ट्रीयसंस्कृतविद्यापीठम्, नवदेहली

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः"।[1] इति शब्दतत्त्ववादिनः शब्दस्य मूलतत्त्वरूपेण ब्रह्मरूपेण स्वीकुर्वन्ति। तत्र प्रायः सर्वे शब्दनित्यानित्यवादिनः दार्शनिका अपि शब्दस्य प्रामणरूपेणाङ्गीकुर्वन्तीति। तस्य शब्दस्य प्रमाणत्वम् आप्तोक्तत्वादाम्नातत्वाच्च सिद्धः भवति। तत्र शब्दप्रमाणस्य फलं शाब्दबोध इति। तत्र शाब्दबोधे पदज्ञानं करणं भवति। तच्च साधकतमं कारणं करणम् असाधारणं कारणं वा। शाब्दबोधे पदार्थज्ञानं व्यापार उच्यते। व्यापारस्तु तज्जन्यत्वे सति तज्जन्यजनकत्वम्, तद्धि पदज्ञानजन्यत्वे सति पदज्ञानजन्या शाब्दीप्रमायाः जनक इति। शाब्दबोधस्तु तस्य प्रमाणस्य फलमिति। उक्तञ्च-

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।।**[2]

तत्र शाब्दबोधे आकाङ्क्षायोग्यतासत्तयः सहकारि कारणानि सन्तीति। एवञ्च पदपदार्थयोः मध्ये यस्सम्बन्धः स तु वृत्तिः शक्तिश्च नाम्नाभिधीयते। वाक्यं तु आकाङ्क्षायोग्यतासत्तिमदेव भवति। तथा हि-

**वाक्यं स्यादाकाङ्क्षायोग्यतासत्तियुक्तः पदोच्चयः।**[3]

आकाङ्क्षा- **"प्रतीतिपर्यवसानविरहः आकाङ्क्षा"**[4]। यथा- कोऽपि वदति कृष्ण इति तदा भवति जिज्ञासा कः कृष्णः किं करोतीति। अतो कृष्णपदं क्रियापदस्य कर्मपदस्य चावश्यकता वर्त्तत इति। अतो "कृष्णः आपणं गच्छती"त्यस्य साकाङ्क्षत्वाद्वाक्यत्वं

---

1. वाक्यपदीयम्- १/१
2. न्यायसिद्धान्तमुक्ताली -८१
3. साहित्यदर्पणम्- २/१
4. साहित्यदर्पणम् -२/१ व्याख्या

सम्भवतीति। परन्तु निरकाङ्क्षपदस्य वाक्यत्वन्न सम्भवतीति। यथा- रामः पशुरश्व इति न प्रमाणम् आकाङ्क्षाविरहत्वात्। योग्यता- **"पदार्थानां परस्परसम्बन्धे बाधाभावो योग्यता"**[1]। यथा- "वह्निना सिञ्चती"त्यस्य वाक्यस्य योग्यतायारभावान्न वाक्यत्वम्। आसत्तिः- **"बुद्ध्यविच्छेद आसत्तिः"**[2], अविलम्बेनोच्चारणं वा। यथा- कोऽपि वदति प्रातः काले "अहं", सायं काले वदति "भोजनं", अग्रिमे सप्ताहे वदति "खादामी"ति तर्ह्यस्य वाक्यस्य बिलम्बेनोच्चारणात्वान्न प्रमाणमिति। सन्निधानं तु पदस्यासत्तिरुच्यते[3]। शब्दमहत्त्वं प्रतिपादयन् भर्तृहरिणोच्यते-

**न सोऽस्ति प्रत्यये लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते।।**[4]

तथा च दण्डी प्रतिपादयति- इदम् अन्धन्तमः कृत्स्नं जायेद्भुवनत्रयम्।

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**[5]

**शब्दस्तदर्थप्रविभेदः** - शब्दस्तु साहित्यिकैस्त्रिविधः विभज्यते। वाचकशब्दः लाक्षणिकशब्दः व्यञ्जकशब्दश्च। तच्चोक्तम् - **स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा**[6]**।**

तस्य शब्दस्यार्थोऽपि त्रिविधः - वाचकशब्दस्य वाच्यः, लाक्षणिकशब्दस्य लक्ष्यः, व्यञ्जकशब्दस्य व्यङ्ग्यश्चेति। तथा च- **"वाच्यादयस्तदर्थाः स्युरि"ति**[7]**।**

तत्रोभयोः शब्दार्थयोर्मध्ये सम्बन्धोऽपि कल्प्यते। स च सम्बन्धः वृत्तिशब्देनाभिधीयते। सा च वृत्तिरपि त्रिधा-अभिधा लक्षणा व्यञ्जना भेदात्। तत्र साक्षात्संकेतितार्थस्य बोधिका शक्तिरभिधोच्यते। तत्र वाचकादिषु मध्ये आदौ वाचकः शब्दः। तस्य स्वरूपं निर्दिश्यन्नुच्यते- **यस्य शब्दस्य यस्मिन्नर्थेऽव्यवधानेन संकेतो गृह्यते स शब्दः तस्यार्थस्य वाचकः।** एवञ्चास्माच्छब्दादयमर्थो बोधव्येतीच्छा शक्तिः यथा- **"इहागृहीतसंकेतस्य शब्दस्यार्थ-प्रतीरभावात् संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयति यस्य यत्राव्ययवधानेन संकेतो गृह्यते स तस्य वाचक"**[8] इति। तथा च काव्यप्रकाशे- **साक्षात्संकेतितं योऽर्थमभिधत्ते स तस्य वाचकः।**

---

1. साहित्यदर्पणम्-2/1 व्याख्या
2. साहित्यदर्पणम्-2/1 व्याख्या
3. न्यासिद्धान्तमुक्तावली -83
4. वा.प.ब्र.का. - 146
5. का. द.
6. काव्यप्रकाशः 6
7. काव्यप्रकाशः 6
8. काव्यप्रकाशः 7 व्याख्या

संकेतग्रहोपायः-संकेतग्रहः व्याकरणोपमानादिना भवतीति। तथा हि-

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥**[1]

1. **व्याकरणाच्छक्तिग्रहः**- धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहः व्याकरणाद्भवतीति। यथा- "भूसत्तायामि"त्यत्र भूधातोः सत्तारूपार्थे शक्तिग्रहो भवति, तिबित्याख्यातस्य कर्तरि रूपार्थे शक्तिग्रहो भवति। "वर्त्तमानेलडि"त्यादौ च प्रत्ययादिभ्यः व्याकरणादेव शक्तिग्रह इति।

2. **उपमानाच्छक्तिग्रहः** - यदि कोऽपि गवयपदार्थमजानन् कमप्यारण्यकं पुरुषं पृच्छति यत् **"गवयः कीदृशो भवती"ति** तदा स आरण्यकः पुरुषो वदति **"गो सदृशो गवयः"** इति। तदा स गवयपदार्थमजानन् पुरुषः अरण्ये गम्य, गवयपिण्डं पश्यति तदा सादृश्यज्ञानादतिदेशवाक्यस्मरणात् "गवयः गवयपदवाच्यरि"ति उपमितिज्ञानं जायत इति।

3. **कोशाच्छक्तिग्रहः**- तद्यथा नीलादिपदानां नीलरूपार्थे नीलविशिष्टे घटादौ च कोशाच्छक्तिग्रहः भवति तद्यथा-**गुणे शुक्लादयः पुंसि गुणि लिङ्गास्तु तदवति**[2]**।**

4. **आप्तवाक्याच्छक्तिग्रहः**- आप्तवाक्यादपि शक्तिग्रहो भवति- यथा कोऽपि आप्तो वदति यदिदं आम्रफलमिति। तत्र कस्याऽपि आम्रफलमजानन् जनः आम्रं पश्येदमाम्रमिति मन्यते। यतो हि- **"यथा भूतस्यार्थस्योपदेष्टाऽऽप्तः"**[3] **"यथार्थवक्ता"**[4] चेति।

5. **व्यवहाराच्छक्तिग्रहः**- अयं मुख्योपाय इति। तत्र प्रयोजकवृद्धः (उपदेष्टा) प्रयोज्यवृद्धं (आज्ञापालकम्) आदिशति यत् गामनय, घटं नय वेति। तत्र कोऽपि जिज्ञासुबालः तं शब्दं श्रुत्वा गवादिषु शाब्दबोधं करोति। **"यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम्, तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतः, तदवधार्य पार्श्वस्थोबालो-घटानयनरूपं कार्यं घटमानयेति शब्दप्रोज्यमिवधारयति"**[5]**।**

6. **वाक्यशेषाच्छक्तिग्रहः**- अत्र "यवमयश्चरूर्भवती"त्यस्य यवशब्दस्य दीर्घशूकार्थे संकेतग्रहः न तु कङ्ग्वर्थ इति। यतो हि चरूर्दीर्घशूकस्य भवति न तु कङ्गोरिति। यथा-

---

1. न्यायसिद्धान्तमुक्ताली शब्दखण्ड
2. अमरकोषः 1/4/17
3. तर्कभाषा
4. तर्कसंग्रहः
5. न्यायसिद्धान्तमुक्ताली- 81

**वसन्ते सर्वसस्यानां जायते पत्रशातनम्।**
**मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः।।**[1]

अत्र वाक्यशेषात् यवारित्यस्य दीर्घशूके शक्तिग्रहो भवति। यतो हि वसन्ते दीर्घशूकानामेव पत्रशातनं न भवति।

७. **विवरणाच्छक्तिग्रहः**:- विवरणस्तु समानार्थकान्यपदस्योच्चारणम् इति। यथा "घटोऽस्ती"- त्यस्यार्थः "कलशोऽस्ती"ति। पचतीत्यस्य पाकं करोतीत्यर्थः।

८. **प्रसिद्धपदसान्निध्याच्छक्तिग्रहः**:- तद्यथा "इह सहकारतरौ मधुरं पिको रौती"त्यस्मिन् वाक्ये सहकारतरुसान्निध्यात् पिकशब्दस्य पिकार्थे शक्तिग्रह इति।

**संकेतग्रहविषये व्यक्तिवादिनां मतम्-**

तत्र एते व्यक्तिवादिनः व्यक्तौ संकेतग्रहः स्वीकुर्वन्तीति। तेषां मते व्यवहारदेव शक्तिग्रहः स च व्यवहारः व्यक्तिनिष्ठ एव। यतो हि कोऽपि कमादिशति यत् गामानयेति तदा स आदेशपालकः बालः गोव्यक्तेरेवानयनं करोति न तु जातेः न च गुणस्य न च क्रियायाः न वा यदृच्छात्मकद्रव्यस्य। अतो व्यक्तावेव शक्तिग्रहः। यतो हि आनयनापनयनाद्यर्थक्रियानिर्वाहकतया प्रवृत्तिनिवृत्तिरूपव्यवहारयोग्यः व्यक्त्येव। यथा "घटमानय" "घटं नय" उभयत्र आनयनमपनयनं घटस्यैव भवति' एवञ्च घटानयनेऽपनयने च प्रवृत्तिः घटे भवति। निवृत्तिः घटभिन्नव्यक्तिष्विति। **"यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव"**[2] इति। तत्र व्यक्तीनामानन्त्यादानन्त्यदोषः व्यभिचारश्च। तत्कथमिति? उच्यते- घटः घटः घटः इत्याद्यनेकाः घटव्यक्तयः, गौः गौः गौः इत्याद्यनेकाः गोव्यक्तयः। तेष्वनेकेषु गोघटव्यक्तिषु प्रत्येकेषु भिन्नः संकेतो यदि स्वीक्रियते तर्हि तेषां गोघटादीनाम् अनन्तानां व्यक्तीनां अनन्तत्वादनन्तः शक्तिग्रहो स्वीक्रियत ततश्चानन्तानां शक्तीनां कल्पने गौरवः स्यादिति। एवञ्च तदानन्त्यदोषवारणाय यदि अनेकेषु गोघटादिषु व्यक्तिषु मध्ये एकस्मिन् द्वये वा संकेतः गृह्यते, एवञ्च तद्भिन्नेषु यदि बोधः विना संकेतेनैव स्यात् तर्हि व्यभिचारदोषः। व्यभिचारस्तु तदभावे तत्सत्त्वम् कारणाभावे कार्यसत्त्वमिति। यत्र विना संकेतशक्तिना संकेतो गृह्यते तत्र संकेतशक्तिरूपकारणाभावात् संकेतरूपकार्यं दृश्यते। अतो तत्र व्यभिचारदोषः दरीदृश्यते। यतो हि- **"व्यक्तिविशेष्यक-शाब्दबोधं प्रति तद्व्यक्तिविशेष्यकसंकेतग्रहस्य कारणत्वं यत् क्लृप्तं तत्र कारणत्वकल्पनेन कारणं विना कार्योत्पत्तौ व्यभिचाराच्च्यर्थरि"**[3]ति। अत एव

---

1. न्यायसिद्धान्तमुक्तावली- 81
2. काव्यप्रकाशः 8
3. काव्यप्रकाशः 8 - विवरणटीका

व्यक्त्यावानन्त्यादोषाद्व्यभिचारदोषाच्च न संकेतो गृह्यते। **"तथाप्यनन्त्याद् व्यभिचाराच्च तत्र संकेतः कर्तुं न युज्यते"**[1]।

**संकेतग्रहविषये नैयायिकानां मतम्-**

नैयायिकाः हि जातिविशिष्ट-व्यक्तौ संकेतं स्वीकुर्वन्तीति। तत्र "शाब्दी हि आकाङ्क्षा शब्देनैव पूर्यते" नियमानुरोधात् शब्दशक्तिलभ्यार्थस्यैव शाब्दबोधेऽन्वयः सम्भवति न त्वाक्षेपलभ्यार्थस्य। यतो हि यदि जातावेव शक्तिग्रहः स्वीक्रियते तर्हि आक्षेपात् व्यक्त्यौशक्तिग्रहः लभ्यते। एवञ्च व्यक्त्यौ संकेतग्रहस्वीकाराद् आनन्त्यव्यभिचारदोषश्च। अतो जातिविशिष्टव्यक्त्यौ शक्तिग्रहरिति। तथा च विश्वनाथपञ्चाननभट्टाचार्यः - **"शक्ति-र्जात्याकृतिविशिष्टव्यक्त्यौ विश्रामयतीति"**[2] इति। **"व्यक्त्याकृतिजातयस्तु पदार्थः"**[3] इति।

**उपाधौ संकेतग्रहः -**

तत्र वैयाकरणैः उपाधौ संकेतो गृह्यते। यतो हि गौरित्यत्र जात्या गौः, गुणेन शुक्लः, क्रियया चल इत्येवं विषयविभागो न प्राप्यते। अत उपाधौ संकेतग्रहः स्वीक्रियत इति।

**उपाधिः**

**वस्तुधर्मः** **वक्तृयदृच्छासन्निवेशितः**

**(द्रव्यः, संज्ञारूपः)**

**सिद्धः** **साध्यः (क्रिया)**

**प्राणप्रदः (जातिः)** **विशेषाधानहेतुः (गुणः)**

उक्तं हि काव्यप्रकाशे मम्मटाचार्येण- "उपाधिश्च द्विविधः- वस्तुधर्मो वक्तृयदृच्छा-सन्निवेशितश्च। वस्तुधर्मोऽपि द्विविधः सिद्धः साध्यश्च। सिद्धोऽपि द्विविधः पदार्थस्यप्राणप्रदो विशेषाधानहेतुश्च। तत्राद्यो जातिः। उक्तं हि वाक्यपदीये **"न हि गौः स्वरूपेण गौर्नाप्यगौः, गोत्वाभिसम्बन्धात्तु गौः"** इति"[4]। जात्यां संकेतग्रहः- **"नित्यमेकमनेकानुगतं सामान्यं"**[5] **"नित्यत्वे सति अनेकसमवेतत्त्वं जातिः"**[6]। सा च जातिः पदार्थस्य

1. काव्यप्रकाशः 8
2. न्यायसिद्धान्तमुक्ताली- 81
3. न्यायसूत्रम् 2/2/63
4. काव्यप्रकाशः - 8
5. तर्कसंग्रहः
6. न्यायसिद्धान्तमुक्ताली

प्राणप्रदाधायक धर्मः। **गुणे संकेतग्रहः** – गुणास्तत्र व्यावर्तकाः। यथा नीलो घटः इत्यत्र नीलं हि शुक्लरक्तादीन् घटान् व्यावृत्य नीलघटे संकेतः स्वीक्रियते। अत उच्यते साहित्यदर्पणकारेण – **"गुणो विशेषाधानहेतुः सिद्धः वस्तुधर्मः। शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्ति"**[1] इति। काव्यप्रकाशे च– **"द्वितीयो गुणः शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते"**[2]। **क्रियायां संकेतग्रहः**– तत्र तृतीयो साध्यरूपवस्तुधर्मो क्रिया। तद्यथा पचतीत्यादौ तण्डुलस्वीकरणं प्रोक्षणमित्यादि यो पूर्वापरीभूतव्यापारः स पाकः इति। तथा च– **"साध्यः पूर्वापरीभूतावयवः क्रियारूपः"**[3]। यथा चोक्तं भर्तृहरिणा–

**गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।**
**बुद्ध्या प्रकल्पितो भेदः व्यपदिश्यते॥**

**समूहः स तथाभूतः प्रतिभेदं समूहिषु।**
**समाप्यतो ततो भेदे कालभेदस्य सम्भवः॥**[4]

**यावत्सिद्धमसिद्धं वा साध्यत्वेन प्रतीयते।**
**आश्रितक्रमारूपत्वात् सा क्रियेत्यभिधीयते॥**[5]

विश्वनाथस्तु – "क्रियाः साध्यरूपा वस्तुधर्माः पाकादयः। एषु हि अधिश्रयणावश्रय-णान्तादिपूर्वापरीभूतो व्यापारकलापः पाकाहिशब्दवाच्यः"[6] इति। यदृच्छाशब्देषु यथा – डित्थादि संज्ञारूपः यदृच्छाशब्दाः। यथा हि– "द्रव्यशब्दा एकवाचिनो हरिहरडित्थड-वित्थादयः"[7]। एते हि हरिहरडित्थडवित्थादयः एकव्यक्तिवाचिन इति। अत उपाधावेव संकेतो युज्यत इति। उक्तं हि यथा– **"चतुष्टयीशब्दानां प्रवृत्तिः- जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चतुर्थाः"**[8] इति। काव्यप्रकाशे च– **"संकेतितश्चतुर्भेदो जात्यादिः"**[9] इति। साहित्यदर्पणे च– संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च[10]।

---

1. साहित्यदर्पणः 2/4
2. काव्यप्रकाशः 8
3. काव्यप्रकाशः 8
4. वाक्यपदीयम् 3/4-5
5. वाक्यपदीयम् 3/1
6. साहित्यदर्पणः 2/4
7. साहित्यदर्पणः 2/4
8. महाभाष्यम्
9. काव्यप्रकाशः 8
10. साहित्यदर्पणः 2/4

**संकेतग्रहविषये मीमांसकानां मतम् -**

मीमांसकैः जात्यामेव संकेतग्रहः स्वीक्रियते। तत्र **"जातिरेव वा"**[1] इत्यादिना मीमांसकानां मतं प्रदर्शयति मम्मटः। जातिस्तु एकाकारप्रतीतेर्हेतुः। "नित्यत्वे सत्यनेकसमवेतत्वं सामान्यमिति"। तद्यथा - शुक्लः हिमः, शुक्लपयः, शुक्लशंखः इत्येषु हिमपयशंखाद्याश्रयेषु भिन्नेषु द्रव्येषु शुक्लादिषु विद्यमानेऽपि शुक्लः हिमः, शुक्लपयः, शुक्लशंखः इति प्रतीतिर्भवतीति। सा प्रतीतिः एकाकारमवबोधयति। तत्र शुक्लस्य यदेकाकारप्रतीतिर्भवति सा प्रतीतिः शुक्लेषु विद्यमानेषु शुक्लत्वजातिवशाद्भवतीति। यथा- "हिमपयः शंखाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिः तत् शुक्लत्वादिसामान्यम्"[2] इति। तण्डुलान् पचामि, इष्टिकान् पचामि, सूपं पचामीत्यत्र पाकक्रिया भिन्नेषु द्रव्येषु वर्त्तते तथापि सा पाकक्रिया एकेति प्रतीतिर्भवति। सा प्रतीतिः पाकत्वजातिवशादेव भवति। यथा च- "गुडतण्डुलादिपाकादिष्वेवमेवपाकत्वादि"[3]। यदृच्छाशब्दस्त्वेकैव तत्र कथम्? जातिः तदुच्यते-बालकोच्चरित रामशब्दः, वृद्धोच्चरित रामशब्दः, शुकोच्चरित रामशब्दः, तत्र बालकवृद्धशुकोच्चरितरामशब्दः भिन्नेति। अतो भिन्न-भिन्नजनानामुच्चारणवशाद् भिन्नरामशब्देऽपि एकाकारप्रतीतिस्तु समेषामेव भवति। तत्र सा प्रतीतिः जातिवशादेवेति। उक्तञ्च- **"बालवृद्धशुकाद्युदीरितेषु च, प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ते"**[4]।

**बौद्धानां मते शक्तिग्रहः-**

अपोहो वेति पदेन बौद्धमतं प्रदर्शयति। अपोहस्तु अतद् व्यावृत्तिः अर्थात् तद्भिन्नभिन्नत्वम्। बौद्धानां मते कस्यापि वस्तुनः सत्ता एव नास्ति। यतो हि ते क्षणभ्ङ्गवादिन इति। अतो नैयायिकानां मते या जातिः नित्या सा अपास्ता इति। यदि जातिः न स्वीक्रियते चेत्तर्हि कथमस्माभिः घटेषु एकाकारात्मिका प्रतीतिः भवतीत्या-शङ्कायामुच्यतेअपोहादिति। तत्र दशघटव्यक्तिषु एकाकारप्रतीतिः भवति सा हि घटभिन्नभिन्नत्वादिति। यतो हि दशघटभिन्नः सम्पूर्णजगत् तत्सम्पूर्णजगद्भिन्नः घटः इति।

✦✦✦

1. काव्यप्रकाश 8
2. काव्यप्रकाश 8
3. काव्यप्रकाश 8
4. काव्यप्रकाश 8

# न्याय-वैशेषिके मीमांसायाञ्च धर्मस्वरूपः

**ध्रुवकुमारोपाध्यायः**
शोधच्छात्रः(विद्यावारिधिः)(सांख्ययोगविभागः)
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्
नवदेहली-११००१६

सभ्यतायाः आदिकालादेव धर्मस्य विषये विचार-विमर्शः प्रचलितोऽस्ति। वैदिककालाद् वर्तमानकालपर्यन्तं धर्म शब्दस्यार्थः समयानुसारं परिवर्तितो जातः। ऋग्वेदस्य पुरुषसूक्ते धर्मपदस्य विषये उक्तम् यत्-"**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।**[1] अर्थात् देवैः यज्ञेन यजनीय पुरुषस्य अर्चनं कृतम्, तेषाम् अर्चनमेव संसारस्य प्रथमो धर्मो वर्तते। ऋग्वेदस्य समानान्तरं यजुर्वेदादि वेदेष्वपि धर्मविषयकं वर्णनं प्राप्नोति। ब्राह्मणग्रन्थेषु, उपनिषत्सु, धर्मसूत्रेषु, स्मृत्यादिषु धर्मविषयकं वर्णनं प्राप्यते। रामायण, महाभारतादिष्वपि धर्मस्य निरुपणं प्राप्नोति। महाभारतस्य कर्णपर्वे धर्मस्य विषये उक्तंयत्-"**धारणाद् धर्ममित्याहुः धर्मो धारयते प्रजाः। यःस्याद् धारणसंयुक्तः स धर्म इति निश्चयः**"।।[2]

कालान्तरे धर्मशब्देन सह दर्शनस्य प्रसक्तिरपि अभवत्, भारतीय दर्शनेषु मोक्षस्य प्राप्तिः परमं लक्ष्यं स्वीकृतं वर्तते। मोक्ष प्राप्तेः साधनेषु जपतपोपासना, भक्तियोगादयः प्रमुखानि साधनानि वर्तन्ते, परञ्च वास्तविकं ज्ञानं प्राप्त्वा आत्मानः अन्तिमं लक्ष्यं मोक्षाय धर्मस्य महती आवश्यकता वर्तते। मीमांसा-वैशेषिकदर्शनस्य च प्रारम्भमेव धर्मस्य व्याख्यया भवति, यः येषां मते मोक्षप्राप्तेः कारणं वर्तते। न्यायसूत्रे धर्मविषयकं वर्णनस्याभावो विद्यते, परञ्च परवर्तिनः नव्यनियायिकैः धर्मविषयकं चर्चामकरोत्।

## मीमांसकानां मते धर्मस्य स्वरूपम्-

"मातुं विचारयितुमिच्छा मीमांसा"[3]। यत्र साङ्गोपाङ्गं विचारं भवति, सा मीमांसेति कथ्यते। मीमांसायां प्रथमं वेदानां तार्किकं विश्लेषणमभवत्, अत एव अयं वेदविचारशास्त्रमपि कथ्यते। कर्म अर्थात् कर्त्तव्यः, यः करणीयः वर्तते, यं धर्मं कथ्यन्ते तेषां तार्किकविश्लेषणेन

1. ऋग्वेद 10/90/16
2. महाभारत, कर्णपर्व-69/58
3. मानपूजायाम्" (भ्वादि) 'मानविचारे' (चुरादि) इति धातोः सन् प्रत्यये कृते साध्यते मीमांसा शब्दः।

अयं कर्मशास्त्रं धर्मशास्त्रञ्च कथ्यते। मीमांसादर्शनस्य प्रारम्भे **"अथातो धर्मजिज्ञासा"**[1] अनेन सूत्रेण धर्मजिज्ञासायाः प्रतिज्ञा महर्षिजैमिनिः करोति। यस्यार्थो वर्तते यत् वेदाध्ययनानन्तरं धर्मविषयकं जिज्ञासाः क्रियेत्।[2] मीमांसासूत्रस्य भाष्यकारः शबरस्वामेः मतानुसारं आचार्यजैमिनिः धर्मजिज्ञासायाः प्रतिज्ञां कृत्वा अथ शब्दस्य प्रयोगं कृतम्- यः वेदाध्ययनान्तरमसम्भवं वर्तते।[3] यतोहि वेदानां वाक्यानां अत्र अनेक प्रकारेण विचारं भविष्यति।[4] प्रकृतसूत्रे धर्मजिज्ञासा पदस्यार्थो वर्तते-धर्माय जिज्ञासा इति।[5] जिज्ञासायाः अर्थमस्ति धर्मस्य ज्ञानस्येच्छा।[6]

### धर्मजिज्ञासायाः प्रयोजनम्-

**"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते"**।[7] इति मत्वा किमर्थं धर्मजिज्ञासा? इति पूर्वपक्षी। पुनश्च स पृच्छति स धर्मः प्रसिद्धः अथवा अप्रसिद्धः? यदि प्रसिद्धः तदा किमर्थं जिज्ञासा, यदि अप्रसिद्धः तदा न शक्यते जिज्ञासितव्य इति। अतो धर्मजिज्ञासा व्यर्थः इति[8]।

अस्याः शंकायाः समाधानार्थं भाष्यकारः वदति- यत् धर्मः न निरर्थकः अपितु सार्थक एव- धर्मविषये प्रतिपादयन् कैश्चन आचार्येः विविधरूपेण धर्मस्यलक्षणं उच्यते। तत्र यदि कोऽपि तस्य लक्षणस्यैकदेशमेव स्वीकरोति तदा अनर्थः प्राप्नोति। अतो धर्मजिज्ञासा कर्तव्य इति।

### धर्मलक्षणम्-

प्रथमसूत्रेण धर्मजिज्ञासायाः प्रतिज्ञां कृत्वा महर्षिजैमिनिः धर्मलक्षणं प्रस्तौति- **"चोदनालक्षणोऽर्थो धर्मः"**[9] इति। अर्थात् क्रियाप्रवर्तकैः वेदवाक्यैः लक्षितविषयः धर्म इति कथ्यते। मीमांसासूत्रस्य भाष्यकारः शबरस्वामी वदति यत्- **"स हि निःश्रेयसेन पुरुषं संयुनक्तीति प्रतिजानीमहे"**।[10] अर्थात् स धर्मः मनुष्यं परमकल्याणेन (मोक्षेन) सह संयुक्तं करोतीति।

1. मीमांसासूत्र-1.1.1
2. वेदाध्ययनानन्तरं यतोऽर्थज्ञानरूपदृष्टार्थकं तदध्ययनम्। -अर्थसंग्रहः पृ. 9
3. तादृशीं तु धर्मजिज्ञासामधिकृत्याथशब्दंप्रयुक्तवानाचार्यः। या......"।। -शाबरभाष्य, पृ. 2
4. वेदवाक्यानामनेकविधो विचार इह वर्तिष्यते"। -शाबरभाष्य, पृ. 2
5. तत्पुरुष समास। -शाबरभाष्य पृ.7
6. "सा हि तस्य ज्ञातुमिच्छा"। -शाबरभाष्य पृ.7
7. श्लोकवार्तिक-कुमारिलभट्टः
8. धर्मः प्रसिद्धो वा स्यादप्रसिद्धो वा? स चेत्प्रसिद्धो न जिज्ञासितव्यः। अथाप्रसिद्धे नतराम्। तदेतदनर्थकं धर्मजिज्ञासाप्रकरणम्"।। -शाबरभाष्य, पृ.10
9. मीमांसासूत्र-1.1.2
10. शाबरभाष्य, पृ. 8

भाष्यकारेण "चोदना" पदस्यार्थः क्रियाप्रवर्तकः वेदवाक्यम् क्रियते।[1] उक्तक्रिया-प्रवर्तकेषु वेदवाक्येषु अपरिमित शक्तिः वर्तते, अस्यैव निर्देशं कृत्वा भाष्यकारेण-निर्दिश्यते यत्- **"चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुं नान्यत्किञ्च, नेन्द्रियम्"**।[2]

श्लोकवार्तिके कुमारिलभट्टेन 'चोदना' पदस्य विषये उक्तम् यत्-**"किमाद्यपेक्षितैः पूर्णः समर्थः प्रत्ययो विधौ। तेन प्रवर्तकं वाक्यं शास्त्रेऽस्मिंश्चोदनोच्यते"**[3] अस्यार्थः क्रियाप्रवर्तकः वेदवाक्यो वर्तते। मुख्यतः विधिवाक्यमेव चोदनेति कथ्यते। यथा "यजेत स्वर्गकामः"। अत्र प्रवृत्तिबोधं लिङ्लकारस्य "त" प्रत्ययेन भवति। अयं प्रवृत्तिक्रियायां मीमांसकाः भावनापि कथ्यन्ते- **"भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापार-विशेषः"**।[4] अर्थात् भविताया: क्रियायाः अनुकूलो भावयिताया: मानसिक व्यापारं भावनोच्यते। लौगाक्षिभास्करेण अर्थसंग्रहे धर्मस्य लक्षणमेतत् कृतं यत्-"वेदप्रतिपाद्यः प्रयोजनवदर्थोधर्मः"[5] अर्थात् यः वेदेन प्रतिपादितं, प्रयोजनेन युक्तं तथा च सार्थकमस्ति स धर्मः।

## वैशेषिक दर्शने धर्म स्वरूपम्

**"विशेषं पदार्थमधिकृत्य कृतं शास्त्रं वैशेषिकम्"**[6] अर्थात् विशेष पदार्थस्य महत्ताया: कारणात् अयं वैशेषिकदर्शनमित्युच्यते। विशेषतः सांख्यात् विशिष्टत्वात् अयं वैशेषिकः। भारतीयानां एवञ्च पाश्चात्यानां एतत् मान्यता वर्तते यत् वैशेषिकदर्शने धर्मः (आचारमीमांसापरक) तत्त्वम् अतीवस्वल्पः अथवा नगण्यो वर्तते। परञ्च सूत्राध्ययनेन ज्ञायते यत् अस्मिन् दर्शने अनेकेषु स्थानेषु धर्मविषयकानि प्रमाणानि प्राप्यन्ते। महर्षिकणादः प्रथमैव सूत्रेण धर्मव्याख्यायाः प्रतिज्ञा क्रियन्ते- **"अथातोधर्मव्याख्यास्यामः"**[7] इति।

## धर्मस्वरूपम्

प्रथमसूत्रेण धर्मव्याख्यायाः प्रतिज्ञानन्तरं महर्षिः धर्मस्य स्वरूपं तल्लक्षणं च प्रतिपादयति-**"यतोऽभ्युदयनिःश्रेयससिद्धिः सधर्मः"**[8] इति। अर्थात् येन अभ्युदयः

---

1. चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः"। -शाबरभाष्य, पृ.8
2. शाबरभाष्य, पृ.9
3. श्लोकवार्तिक-1/1/2/3
4. अर्थसंग्रहः, पृ.18
5. अर्थसंग्रहः, पृ.11
6. न्यायकोशः
7. वैशेषिकसूत्र-1.1.1
8. वैशेषिकसूत्र-1.1.2

निःश्रेयसं च भवति स धर्मः। धर्मस्य साधारणतः द्वौ रूपौ स्तः- प्रवृत्तिधर्मः, निवृत्तिधर्मश्च। तत्र प्रवृत्ति धर्मेण अभ्युदयः एवञ्च निवृत्ति धर्मेण निःश्रेयसो भवति। अस्मिन्विषये आचार्यमनुना उक्तं यत्-

**"सुखाऽऽभ्युदायिकं चैव नैःश्रेयसिकमेव च। प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्"**॥[1] वैशेषिकसूत्रोपरि उपस्कारभाष्ये आचार्यशङ्करमिश्रेणोक्तं अभ्युदय-पदस्यार्थः तत्त्वज्ञानम् तथा च निःश्रेयस पदस्यार्थः आत्यन्तिकं दुःखस्य निवृत्तिः।[2] निवृत्तिरूपतत्त्वज्ञानमेव निःश्रेयसस्य कारणमस्ति, अस्मिन् विषये श्रुतिरेव प्रमाणः। तथा च वैशेषिकसूत्रे श्रुतेः प्रामाण्यस्य विषये कणादेनोक्तं यत्- **"तवचनादाम्नायस्य प्रामाण्यम्"**।[3] उपस्कारभाष्ये तत् पदस्यार्थः ईश्वरः वर्तते। ईश्वरोक्तत्वात् आम्नायस्य प्रामाण्यं सिद्ध्यति। एतदतिरिक्तम् आचार्यशङ्करमिश्रः "तत्" पदेन धर्मस्यापि ग्रहणं करोति। धर्मस्य प्रतिपादने वेदस्य प्रामाण्यमस्ति यतोहि यः वाक्य प्रमाणविषयमर्थं प्रतिपादयति स प्रमाणं भवति।

वैशेषिकदर्शनानुसारं धर्मविशेषेणोत्पन्नं द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायादयः षड् पदार्थानां साधर्म्य-वैधर्म्यरूपतत्त्वज्ञानेन निःश्रेयसो भवति- **"धर्मविशेष प्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निः श्रेयसम्"**।[4]

सप्तपदार्थेषु द्वितीयो पदार्थः गुणो वर्तते, यस्य महर्षिकणादेन सप्तदश भेदानि स्वीकृतानि[5] तथा व परवर्ती आचार्यैः "च" शब्दस्य समुच्चयेन सप्तभेदान्यपि स्वीकृतानि वर्तन्ते।[6] एतेषु गुणेषु धर्माधर्मस्य, यः अदृष्टाः तेषामन्तर्भावं कृतमस्ति। इमे आत्मानः विशेषगुणाः सन्ति। तर्कसंग्रहकारेण अन्नम्भट्टेन धर्मस्य लक्षणं कृतम्- **"वेद विहित कर्मजन्यो धर्मः"**।[7] अर्थात् वेद विहितं कर्मैः जन्यमदृष्टं फलं धर्मं वर्तते। अधर्मस्य लक्षणं वर्तते- "वेदनिषिद्धकर्मजन्योऽधर्मः"[8] इति। अर्थात् वेदेन निषिद्धानां कर्माणा-माचरणेनोत्पन्नमदृष्टं फलमधर्मं वर्तते। वैशेषिकसूत्रस्योपस्कारभाष्ये आचार्यशङ्कर-

---

1. मनुस्मृति-12/88
2. अभ्युदयस्तत्त्वज्ञानंनिःश्रेयसमात्यान्तिकी दुःखनिवृत्तिः यतः.......॥ -उपस्कारभाष्य, पृ.10
3. वैशेषिकसूत्र-1.1.3
4. वैशेषिकसूत्र-1.1.3
5. रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि प्रथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषौ प्रयत्नाश्च गुणाः"। -वैशेषिकसूत्र-1.1.6
6. "च शब्द समुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारदृष्टशब्दाः......"॥ -प्रशस्तपादभाष्य, पृ.3
7. तर्कसंग्रहः, पृ.14
8. तर्कसंग्रहः, पृ.162

मिश्रेण धर्माधर्मौ संसारस्य मूलकारणं मत्वा प्रतिपादितं यत्– **"संसारमूलकारण-योर्धर्माधर्मयोः.....**।।[1] धर्माधर्मयोः कर्मफलेन पूर्वजन्मस्य पुनर्जन्मस्य च सिद्धिः स्वतः भवति। अनेन एतदपि सिध्यति यत् कर्मफलमथवा धर्माधर्मस्वरूपेऽदृष्टं नित्यं वर्तते। यतोहि अयं पापस्य पुण्यस्य च रूपेऽस्य जीवनस्य पर्यन्तमपि आत्मनः सहसंस्काररूपेण तिष्ठति तथा च तस्य पुनर्जन्मस्याधारं भवति।[2]

### न्यायदर्शने धर्मस्वरूपम्

न्यायदर्शनं भारतीयदर्शनेषु अन्यतमम्। वैदिकदर्शनेषु न्यायशास्त्रस्यापि गणना विधीयते। न्यायसूत्रे धर्मविषयकं विचाराणामभावः वर्तते। न्यायशास्त्रं प्रमाणशास्त्रं कथ्यते। तथा च वैशेषिकदर्शनं पदार्थशास्त्रं कथ्यते। दर्शनानां विकासक्रमे न्यायदर्शनः वैशेषिकदर्शनस्य पदार्थमीमांसां तथा च वैशेषिकः न्यायस्य प्रमाणमीमांसां स्वीक्रियते। अत एव इमे समानतन्त्राः। वैशेषिकदर्शनानुसारं न्यायदर्शनेऽपि धर्मस्य स्वरूपं स्वीकृतम्। न्यायदर्शनस्य ग्रन्थतर्कभाषायां केशवमिश्रेण चतुर्विंशति गुणानां विवेचनं कृतम्। तत्र धर्माधर्मस्य लक्षणं कृतम्– **"धर्माऽधर्मौसुखदुःखयोरसाधारणकारणे"**।[3] अर्थात् सुखस्याधारणकारणं धर्मः तथा च दुःखस्याधारणकारणम् अधर्मरित्युच्यते। यः आत्मनः विशेषगुणं वर्तते स एव धर्मोऽधर्मश्च।[4] **"वेदे तु परमाप्तश्रीमहेश्वरेण कृतं सर्वमेव वाक्यं प्रमाणम्"**[5] अर्थात् धर्मस्य प्रमाणभूतं वेदस्य सर्वाणि वाक्यप्रमाणानि सन्ति, ईश्वरोक्तत्वात्।

### नव्यन्यायेधर्मस्यस्वरूपम्-

नव्यन्यायस्य प्रवर्तकाचार्यः गङ्गेशो वर्तते। अनेन विरचितं तत्त्वचिन्तामणिनव्यन्यायस्य आद्यग्रन्थः मुख्यग्रन्थश्चास्ति। "नव्यन्यायभाषाप्रदीपः" यः नव्यन्यायस्य परिचायको ग्रन्थो वर्तते यस्मिन् धर्मस्य लक्षणं कृतं यत्– **"धर्मः ध्रियते तिष्ठति वर्तते यः स धर्मः"। आकाशादिकं विना सर्व एवं पदार्थाः यत्र कुत्रचिदपि वर्तन्त इति सर्व एव धर्मा इत्युच्यन्ते। यत्र यः वर्तते स तस्य धर्मः। यथा द्रव्ये जातिगुणकर्माणि तिष्ठन्तीति जातिगुणकर्माणि द्रव्यस्य धर्माः। सूत्रादौ अवयवे पटादि अवयविद्रव्यं तिष्ठति इति द्रव्यम् अपि पटादिः सूत्रादेः धर्मः। पात्रे जलं वर्तते इति पात्रस्य धर्मः जलम्। आकाशादिकं तु न कुत्र अपि वर्तते इति आकाशं न कस्य अपिधर्मः जलम्। आकाशादिकं तु न कुत्र अपि वर्तते इति आकाशं न कस्य अपि धर्मः।**

---

1. उपस्कार, पृ.359
2. न्यायमञ्जरी, भाग-2, पृ.43
3. तर्कभाषा, पृ.211
4. यश्च शरीरादिजनक आत्मविशेषगुणः स एव धर्मोऽधर्मश्च। -तर्कभाषा, पृ.212
5. तर्कभाषा, पृ.111

**अत एव आकाश अवृत्तिपदार्थ इति उच्यते"।**[1]

**धर्मस्य भेदाः**- धर्मप्रथमतः द्विविधः जातिरुपाधिश्चेति। **जातिः**-"येन परस्परं विभिन्नरूपाणामपि एकजातीयद्रव्याणामेकश्रेण्यामन्तर्भावो भवति, सधर्मोजातिः"।[2] "यथा विभिन्नदेशीया मनुष्या विभिन्नाकाररूपस्वभावा अपि एकया मनुष्यत्वजात्या एकश्रेण्या-मन्तर्भाविताः। जातिश्च सामान्यं नाम कणादोक्तश्चतुर्थः पदार्थः"।[3] **उपाधिः**-"उपाधिरपि पुनःसखण्डोपाधिरखण्डोपाधिश्चेति द्विविधः। **सखण्डोपाधिः- "खण्डेन (अंशेन) सह वर्तते इति सखण्डः। यश्च अंशतो विभक्तुं शक्यते स सखण्डोपाधिधर्म इति यावत्**"।[4] "यथा पशुत्वम्। तद्धि लोमलाङ्गूलवत्त्वम्। ततश्च तस्य लोमलाङ्गूलादय अंशाः बहवो वर्तन्त इति द्रव्यरूपं पशुत्वं धर्मः सखण्डोपाधिः। एवं रूपवानयम् इत्यत्र गुणात्मकं रूपं धर्मः। स च सखण्डोपाधिः। रूपत्वजात्याश्रयो हिरूपम्। ततश्च रूपस्य रूपत्वजाति आश्रयश्चेति अंशद्वयम्"।[5]

**अखण्डोपाधिः-"यस्यांशविशेषो नास्ति मनुष्यत्व-द्रव्यत्वादिजातिवत् यस्तु अंशतो विभक्तुं न शक्यते अंशरहितत्वमेव यस्य स्वरूपमङ्गीक्रियते सः अखण्डोपाधिः"**।[6] यथा भावत्वम्। तद्धि अभावत्वविरोधी कश्चन धर्म इति। पशुत्वादिवत्भावत्वम् अंशतो विभक्तुं न शक्यते।

जातेरपि अंशविभागो नास्ति। किन्तु जातेः समवाय-सम्बन्धेन सत्त्वंनियतम्। अखण्डोपाधेस्तु न तथा। तस्य स्वरूपसम्बन्धेन सत्त्वमिति अनयोः पृथगुल्लेखः।[7] अर्थात् जातेरखण्डोपाधेश्च अंशविभागं न भवति। जातिरूपं धर्मः स्वधर्मिनि समवायसम्बन्धेन तिष्ठति। तथा च अखण्डोपाधिरूपं धर्मः स्वधर्मिणि स्वरूपसम्बन्धेन तिष्ठति। अयमेव उभयोः मध्ये भेदो वर्तते।

चत्वारो अवच्छेदकाः भवन्ति-धर्म-सम्बन्ध-काल-देशश्च। द्रव्यस्य नैसर्गिक धर्मेण तस्य आहरितधर्मम् अवच्छिन्नं क्रियते। अर्थात् प्राकृतिको धर्मः आहरितधर्मस्यावच्छेदको भवति। प्राकृतिक धर्मस्य ज्ञानाय नव्यन्याये 'त्व' प्रत्ययस्य प्रयोगो भवति। यथा-घटत्व, पटत्वादि। तथा च आहरितधर्मस्य ज्ञानाय "तल्" प्रत्ययं प्रयुज्यन्ते। यथा-कारणता, कार्यतादयः।

---

1. नव्यन्यायभाषाप्रदीप, पृ.21
2. नव्यन्यायभाषाप्रदीप, पृ.26
3. नव्यन्यायभाषाप्रदीप, पृ.26
4. नव्यन्यायभाषाप्रदीप, पृ.28
5. नव्यन्यायभाषाप्रदीप, पृ.28
6. नव्यन्यायभाषाप्रदीप, पृ.29
7. नव्यन्यायभाषाप्रदीप, पृ.29




**उपसंहारः-**

प्रस्तुत शोधपत्रे "न्यायवैशेषिक-मीमांसायाञ्च धर्मनिरूपणम्" प्रारम्भे मीमांसादर्शने विवेचितं धर्मस्य स्वरूपबोधं कृतम्। वैशेषिक दर्शनस्य प्रारम्भोऽपि धर्मव्याख्यायाः प्रतिज्ञया भवति। एषां मते अभ्युदयस्य (लौकिक कल्याणस्य) तथा च निःश्रेयसस्य (परमकल्याणस्य) सिद्धिः येन भवति स धर्मः। मीमांसानुसारं वैशेषिकः वेदस्य प्रामाण्यं स्वतः सिद्धं कृतम्, परञ्च वैशेषिके वेदः ईश्वरोक्तं मन्यते। ईश्वरः सर्वज्ञः अतो तस्य ज्ञानं भ्रमादि दुर्गुणैः रहितं वर्तत्ते। अत एव वेदस्य स्वतः प्रामाण्यं सिद्ध्यति।

वैशेषिकाः पदार्थेषु गुणस्यान्तर्गते धर्मं मन्यन्ते, यः आत्मनः विशेषगुणं वर्तते।वैशेषिकाः धर्माधर्ममदृष्टं मन्यन्ते। वैशेषिकमते यः अदृष्टः, तं मीमांसकाः अपूर्वरूपे मन्यन्ते। न्यायदर्शनेऽपि वैशेषिकानुसारं गुणस्यान्तर्गते धर्मः तिष्ठति, यः आत्मनः विशेषगुणो वर्तते। नव्यन्याये धर्मः, यः द्रव्याणांगुणः। धर्मः यः तिष्ठति, यः धार्यते, य विद्यमानं वर्तते स धर्मः कथ्यते।धर्मस्य जातिरुपाधि द्वौ भेदौ स्तः। यं धार्यते, अयं धर्मस्याचारपरको अर्थो वर्तते। यः तिष्ठति, विद्यमानः, स धर्मः, यः द्रव्येषु तिष्ठति गुणः, अस्मिन् अर्थे धर्मो प्रयुक्तः इति।

✦✦✦

# वेदस्मृत्योः धर्मादिपुरूषार्थविचारः
# "भारतस्य प्रतिष्ठे द्वे संस्कृतिस्था"

**आचार्य- वाणी विलास डिमरी**

वेदविभागाध्यक्षः

श्री बदरीनाथवेद वेदाङ्ग स्नातकोत्तर

संस्कृत महाविद्यालय जोशीमठ

वेद भारत एव न अपि तु विश्वस्य समस्त मनीषिणां कृते ज्ञानस्त्रोतः, अस्ति, ज्ञानार्थक विद्घातोः वेद शब्दस्य निष्पत्तिर्भवति, यस्यार्थः ज्ञान प्राप्ति र्भवति, कस्यापि विषयस्य ज्ञानं तद् ज्ञानादेव कर्तुं शक्यते एवं वेद शब्दः ज्ञान पर्याय वाचको विद्यते, वेदानामपारो महिमा अस्ति वेदाः ज्ञानस्य निघयः धमस्य मूलस्त्रोतांसि भारतीय संस्कृतेश्च मूलाधारा विद्यन्ते, अतः वेदः ब्रह्मस्वरूपमेव अस्ति, वेदाः राष्ट्र प्रेमणः देशसेवायाश्च उत्सर्ग मूलकाः सन्ति, अस्माद् हेतोः वेदानां साम्प्रतमपि राष्ट्रव्यापी प्रचारोऽस्ति, अस्माकं देवलायेषु तीर्थस्थानेषु चापि तेषां प्रभावोऽक्षुण्णतया विद्यते, वेदेषु स्वकीय गौरवशालिनीं अतीतां चाकचक्यतां विलोक्य अद्यापि वयं स्वमस्तकं गर्वोन्नतं कतु शक्नुवन्ति वेदेषु राष्ट्रीयतायाः उदात्तभावना परिपूर्णरूपेण समावेशितास्ति, सर्वधर्मापेखया प्राचीनस्य सर्वार्थसाघकस्य सकलहितप्रवीणस्य समस्तदोषविहीनस्य सनातनरूपस्य धर्मस्य प्राचीन-भारतस्य च कल्पनापि वेदं बिना न समुदेति, यथा लोचनविरहितो जनः कस्यापि पदार्थस्य दर्शने सामर्थ्यरहितो भवति तथैव वेद विहीनोऽपि जनः कस्यापि पदार्थस्य दर्शने सामर्थ्यरहितो भवति तथैव वेद विहीनोऽपि जनः आध्यात्मिक पदार्थावलोकने सर्वथा असमर्थतामेव भजते, प्रत्यक्षादिभिः प्रमाणैरप्यनधिगतस्य तत्त्वस्य बोधनादेव वेदस्य वेदतेति सुस्पष्टमुक्तं मनुना-

**"प्रत्यक्षेणानुमित्या वा[1] यस्तूपायो न बुध्यते।**
**एतं विदन्ति वेदेन तस्माद्वेदस्य वेदस्य वेदता॥"**

इत्थं वेदस्य महत्वं सर्वातिशायि विदित्वा भारतीयानां जनानां तत्र श्रद्धा स्वाभाविकी विद्यत एव, अतएव वेदस्याध्ययनं सर्वैरेव निष्कारणं कर्तव्यमिति समुपदिशाति महाभाष्यकारो भगवान् पतञ्जलिः-

---

1. आचार्य सायण यजुर्वेद तैतिरी संहिता (उपोद्धात)

**"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो ज्ञेयोऽध्येतव्यश्चेति[1]"**

प्राचीनकालात् एव भारतवर्षाऽयं धर्मेण सदाचारेण संस्कृत्या च सकलस्यापि विश्वस्य श्रद्धाकेन्द्रः आसीत् यत्र चाभ्युदय निश्रेयस साधकं धर्ममुपार्जयितुं देवा अपि मानुषं जन्मं वाञ्छन्ति, अयमेव भारतदेशः वेदगवीनां उद्गम भूमिरिति यासां सदुपदेशपीयूषेण पविताः सर्वे धर्माः अतएव वैदिकधर्मः स समृद्धः शोभते यस्य शाखामामा एव गष्यन्ते बौद्धादयो विविधा धर्माः वर्तमाने भारते यावन्त्यपि मतोपमतानि सन्ति प्रसृतानि तेषां मूलस्त्रोतो वेदभ्य एव निर्गतमस्ति तस्माद् वेदा एव सर्वम धर्मे मूलं प्रमाणम्-

**"वेदोऽखिलो धर्ममूलम्"[2]**

प्रवृत्ति निवृत्ति लक्षणज्ञय द्विविघस्यापि धर्मस्य मन्त्रब्राह्मणात्मको वेद एव तत्र प्रवृत्तिलक्षणा धर्मो यागादिः निवृत्तिलक्षणश्च अद्वैतात्मज्ञानं तदैव परमोधर्मः कथ्यते, भगवतामनुना धर्माचरणस्य मूलमाधारो वेद एव स्वीकृतोऽस्ति यतो हि सः सर्वज्ञानमयो विद्यते, उक्तं च यथा-

**"यः कश्चित् कस्यचिद्धर्मोमनुना परिकीर्त्तितः।[3]**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥"**

तथा च वेद प्रतिपादितं धर्ममनुतिष्ठन् मानवः इह लोके धार्मिकत्वेन आनुषङ्गिकीं कीर्त्तिं परलोके च धर्मफलमुत्कृष्टं स्वर्गापवर्गादि सुखं च लभते, मनुना उक्तम्-

**"श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः।[4]**
**इहकीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्॥"**

श्रौतस्मार्त्तभेदात् धर्मो द्विविधो निर्दिष्टोऽस्ति, तत्र श्रोतधर्मो मूलरूपेण वेदेन सम्बद्धोऽस्ति स्मार्त्तधर्मश्च वर्णाश्रमाणां विविधासु व्यवस्थासु सामाजिक परम्परासु चाधारितोऽस्ति, किन्तु स्मृतिकाराः वेदमेव धर्मस्यादि मूलं मन्यन्ते वेदेषु ब्राह्मण ग्रन्थेषु वा ये धर्माः प्रतिपादिताः सन्ति तान् धर्मान् अनुसृत्य धर्म सूत्रकाराः स्मृतिकाराश्च स्वस्वग्रन्थान् विरचितवन्तः एवं च सर्वश्रेयः साधको निखिल पुरूषार्थ चतुष्टय प्रापको धर्मो वेदादेव यथावदधिगन्तुं शक्यते, वेदेषु एव प्राक्तन भारतीयानां जीवन दर्शनमाचार-विचाराः नैतिकं सामाजिकं च चरितं प्राप्यते, मानवानां विभिन्न कर्त्तव्यदिनिर्धारणं तत्रौवोपलभ्यते, भारतीय अर्थनीतिरपि वेदमूलैवेति, सर्वे विद्वांसो भारतीय दार्शनिकाः

1. पातञ्जलमहाभाष्यम्
2. मनु. स्मृ. 2.6
3. मनु. 2.7
4. मनु. 2.9

आचारशिक्षक प्रवणाः स्मृतिकाराः शब्दत्त्वमीमांसा दक्षाः अन्ये च शास्त्रकाराः वेदानां प्रामाण्यं प्रतिपदमुद्घोषयन्ति।

**धन्यं हि भारतं वर्षं धन्याः भारत संस्कृतिः।**
**भारतीयाः जनाः धन्याः धन्यास्माकं परम्परा॥**

**भारतस्य प्रतिष्ठे द्वै संस्कृतं संस्कृतिस्तथा।**
**जयतु संस्कृतम्, जयतु भारतम्॥**

दार्शनिकों, संतो, साहित्यकारो, नीतिज्ञों, और वैज्ञानिकों के विचारों को पढ़कर जीवन में बहुत लाभ मिलता है, मौर्यकाल में जहाँ नीतिज्ञों में चाणक्य का नाम विख्यात था, वहीं दार्शनिकों और मनोवैज्ञानिकों पाणिनी और पतंजलि का नाम सम्मान के साथ लिया जाता है। वैज्ञानिकों में पिङ्गल, बाणभटट, जीवक आदि महान वैज्ञानिक थे। हालांकि इसके पूर्व महाभारतकाल में तो और भी महानतम् लोग थे, धर्म, ज्ञान, विज्ञान और संस्कार के मामले में भारत से ज्यादा समृद्धशाली देश कोई दूसरा नहीं, भारत ने दुनिया को सभी तरह का ज्ञान दिया और आज उस ज्ञान के कारण पश्चिम और ची जगत के लोग अपना जीवनस्तर सुधारने में लगे हैं। भारतीय बुद्धि का दुनिया में लोहा माना जाने लगा है, तो उसी ज्ञान के बल पर जो हमारे ऋषि मुनि हमें दे गयें हैं जिससे हमारी पहचान विश्वगुरू वु रूप में विख्यात हुई हैं।

**श्लोक संख्या-1**

**उतिष्ठत जाग्रत प्राप्य वरान्निबोधत॥**[1]
**क्षुरस्यधारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति।**

(14) कठोपनिषद कृष्ण यजुर्वेद

**अर्थः**- हे मनुष्यों उठो, जागो (सचेत हो जाओ) श्रेष्ठ (ज्ञानी) पुरूषों को प्राप्त (उनके पास जा) करके ज्ञान प्राप्त करो, त्रिकालदर्शी (ज्ञानी पुरुष) उस पथ (तत्वज्ञान के मार्ग) को छुरे की तक्ष्ण (लांघने में कठिन) धारा के (के सदृश) दुर्गम (घोर कठिन) कहते हैं।

**मंत्र संख्या-2**

**"मा भ्राता भ्रातरं द्विक्षन्, मा स्वसारमुत स्वसा[2],**
**समयञ्चः सव्रता भूत्वा वाचं वदत भद्रत"॥** अथर्ववेद 3.30.3

1. कठोपनिषत् कृष्ण यजुर्वेद
2. अथर्ववेद 3.30.3

**अर्थः**- भाई, भाई से द्वेष न करें, बहन बहन से द्वेष न करें, समान गति से एक दूसरे का आदर-सम्मान करते हुए परस्पर मिलजुलकर कर्मों को करने वाले होकर अथवा एकमत से प्रत्येक कार्य करने वाले होकर भद्रभाव से परिपूर्ण होकर संभाषण करें, उक्त तरह की भावना रखने से कभी गृह कलह नहीं होता और संयुक्त परिवार में रहकर व्यक्ति शांतिमय जीवन जी कर सर्वांगीण उन्नति करता है।

**मंत्र संख्या-3**

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।।**[1]
**ॐ सहनाववतु सह नौ भनक्तु सह वीर्यं करवावहै2,**
**तैजस्विनावधीतमस्तु मा विद्विषावहै।।**

(कठोपनिषद्-कृष्ण यजुर्वेद)

**अर्थः**- परमेश्वर हम शिष्य और आचार्य दोनो की साथ-साथ करें, हम दोनों को साथ-साथ विद्या के फल का भोग कराए, हम दोनों एक साथ कमलकर विद्या प्राप्ति का सामर्थ्य प्राप्त करें, हम दोनों का पढ़ा हुआ ज्ञान तेजस्वी हो, हम दोनों परस्पर द्वेष न करें।

## "धर्मादि पुरूषार्थ चतुष्टय"

चार पुरूषार्थों में पहले धर्म है, और अन्त में मोक्ष, बीच में अर्थ और काम है, इस क्रम को लगाने में भी रहस्य है। धर्म और मोक्ष के बीच में काम और अर्थ का रखा गया है, यह क्रम बतलाता है कि अर्थ और काम को धर्म और मोक्ष के अनुसार प्राप्त करना है। धर्म और मोक्ष ये दोनो पुरूषार्थ मुख्य हैं, बाकी के दोनों अर्थ और काम गौण हैं, धर्म के विरूद्ध कोई भी पुरूषार्थ सिद्ध नहीं होता धर्म का हमेशा स्मरण रखो सबसे प्रथम पुरूषार्थ धर्म है, धर्मानुसार ही अर्थ और काम की प्राप्ति करनी है। पैसा मुख्य नहीं है धर्म ही मुख्य है। मानव जीवन में धर्म ही प्रधान है, धन से सुख नही मिलता, सुख मिलता है अच्छे संस्कारों से संयम से और सदाचार से प्रभुभक्ति से धर्माचरण एव त्याग से सुख मिलता है। धर्म से धर्म से धन कभी भी श्रेष्ठ नहीं हो सकता, धर्म इह लोक और परलोक में सुख देता है। मरणोपरान्त धन साथ नहीं जाता धर्म ही साथ जाता है। अतः धन से धर्म श्रेष्ठ है। जब से लोग अर्थ को महत्व देने लगे है, तब से जीवन बिगड़ गया है। जीवन के संस्कार बिगड़ गये हैं, जब मनुष्य धर्म को धन से विशेष समझता है, तब जीवन सुधरता है, और सुसंस्कृत हो जाता है। अर्थ को धर्मानुकूल रखो, जो अर्थ धर्मानुकूल नहीं होता वह अनर्थ है, देश को सम्पत्ति

1. ऋग्वेद 10.191.2
2. तै. आ. 8.1.1

की जितनी जरूरत है इससे अधिक अच्छे संस्कारो की जरूरत है, हमें अपने जीवन में धर्म को सबसे प्रथम स्थान देना चाहिए, जीवन में जब काम सुख तथा अर्थ गौण बनात है तभी जवनीन में दिव्यता आती है। दिव्यता का अर्थ है देवत्व का प्राप्त करना, धर्म की गति अति सूक्ष्म है, धर्म भी कई बार अधर्म बन जाता है। सद्भावना के अभाव में किया गया धर्म सफल होता है। मनुष्य के शत्रु बाहर अर्थ है ईश्वर। ईश्वर का भाव जो सबमें प्रत्यक्ष सिद्ध करे उसीका धर्म पूर्णत: सफल होता है। मनुष्य के शत्रु बाहर नहीं है, वे तो मन के अंदर ही है। अंदर के शत्रुओं को मारोगे तो जगत में तुम्हारा कोई शत्रु नहीं रहेगा। धर्म सद्भाव के बिना सफल नहीं होता जगत के किसी भी जीव के प्रति कुभाव रखोगे तो वह जीव के प्रति कुभाव रखोगे तो वह जीव भी तुम्हारे प्रति कुभाव ही रखेगा। सभी क्षेत्रों में क्षेभत्र रूप से परमात्मा बसे हुए हैं इसलिये कभी भी जीव के प्रति कुभाव रखना ईश्वर के प्रति कुभाव रखन के बराबर है, शास्त्रों में तो यहाँ तक कहा गया है कि किसी जीव के साथ तो क्या किसी जड पदार्थ के प्रति भी कुभाव नहीं रखना चाहिए, कहा गया है- "सुहृद: सर्वभूतानाम्" ऐसा नहीं कहा गया कि "सुहृद: सर्वजीवानाम्" जड पदार्थों के साथ भी प्रेम करना है। सबमें सद्भाव रखों अर्थात् जड पदार्थो के प्रति भी प्रेम रखो, मनुष्य में जब स्वार्थ बुद्धि जागती है, तब वह दूसरे का विनाश करने के लिये तत्पर होता है। यदि तुम दूसरे प्रति कुभाव रखोगे तो निश्चय ही उसके मन में भी आपस प्रति कुभाव जगेगा, दुनिया में भाव शुद्धि सबसे बड़ा तप है। मानव जीवन तप के लिए ही है। जगत में किसी भी जीव के प्रति बैर मत रखो, शुद्ध भावना से रहित किया गया सत्कर्म भी किसी काम का नहीं होता, उससे कई बार धर्म भी अधर्म बन जाता है। सत्कर्म करनें भी यदि हेतु शुद्ध नहीं हा तो वह सत्कर्म भी पाप बन जाता है। दक्ष प्रजापति ने भगवान् शिवजी के प्रति कुभाव रखा। अत: उसका धर्म अधर्म में बदल गया, अर्थात् उसका किया गया यज्ञ ही उसको ही मारनेवाला हो गया, विचारोपरान्त पुरूषार्थ चतुष्ठय में धर्म ही प्राण हैं।

**"धर्मानुगोगच्छति जीव एक:"**

✦✦✦

# वेदेषु स्त्रीणामधिकारः

**-डॉ. सन्दीप भट्ट**

वैदिक साहित्य में स्त्री को बहुत आदरणीय स्थान व अधिकार प्राप्त है। वह पुरूष की सहायक और सहयोगी है। मैत्रायणी-संहिता[1], काठक-संहिता[2] में निरूक्तकार[3] ने स्त्री शब्द का प्रयोग किया है। "स्त्री" शब्द की व्युत्पत्ति करते हुए- "स्त्यायाति गर्भो यस्यामिति" ऐसा कहा गया है। स्त्यै-स्त्यायते से डट् प्रत्यय, ड़ीप् होने से "स्त्री" रूप बनता है। क्षीर स्वामी ने भी कहा है। कि नारी को स्त्री इसलिस कहा जाता है। क्योंकि गर्भ की स्थिति उसके भीतर रहती है। भाष्यकार पतंजलि ने-"शब्द-स्पर्श-रूप-गन्धानां-गुणानां स्त्यानं स्त्री''। अर्थात् शब्द, स्पर्श, रूप, रस, और गन्ध के विकास का नाम ही स्त्री है। क्योंकि स्त्री इन्हें वहन करती है। "स्त्यै शब्दसंघातयोः" यहॉ शब्द तथा संघात अर्थ में "स्त्यै" धातु का प्रयोग हुआ है। अधिकरणसाधना लोके स्त्री, स्तायत्यस्यां गर्भ इति।'' अर्थात् लोक में अधिकरण साधना स्त्री है, जिसमें गर्भ संघात रूप में प्राप्त होता है। यास्क ने "स्त्रीयः एव एताः शब्दस्पर्शरूपरसगन्धहारिण्यः" (निरूक्त अध्याय 14 खण्ड 20) कहकर पतंजलि के सिद्धान्त के विपरीत वहन के स्थान पर अपहरण को प्रमुखता दी है। ऋग्वेद में स्त्री को ही घर कहा गया है। 'जायेदस्तम्'[4] अर्थात् जाया- पत्नी, इत्-ही, अस्तम् घर है। इसी आधार पर संस्कृत का सुभाषित है **'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते'** अर्थात् घर को घर नहीं कहते हैं। अपितु गृहिणी को ही घर कहा जाता है।

**गृहान् गच्छ गृहपत्नी यथासः।[5]**
**सम्राज्ञी श्वशुरे भव, सम्राज्ञी श्वश्र्वां भव।**
**ननान्दरि सम्राज्ञी भव, सम्राज्ञी अधि देवृषु॥**

---

1. यत्स्थालीं सिञ्चन्ति न दारुमयं तस्मात्पुमान् दायादः स्त्र्यदायादथ यत्स्थालीं परास्यन्ति न दारुमयं तस्मात्स्त्रियं जातां परास्यन्ति न पुमांसमथ स्त्रिय एवातिरिच्यन्ते। (मै०सं०4.6.4,1. 10.110)
2. परा स्थालीमस्यन्ति न वाक्यं तस्मात्स्त्रियं जातं परास्यन्ति न पुमांसम्। (का०सं०27.9)
3. तस्मात्पुमान्दायादो दायादा स्त्रीति विज्ञायते तस्मात्स्त्रियं जातां परास्यन्ति न पुमांसमितिच। (निरुक्त 3.1.4)
4. ऋग्० 3.53.4
5. ऋग्० 10.85.26

विवाह के पश्चात् स्त्री को एक ओर पति, सास-ससुर और घर वालों की सेवा-शुश्रूषा का निर्देश दिया जाता है तो दूसरी ओर उसे गृहस्वामिनी, गृहपत्नी आदि के रूप में प्रस्तुत करते हुए उसे सास-ससुर, देवर ननद आदि की सम्राज्ञी (स्वामिनी, मालकिन) कहा गया है।[1]

इससे ज्ञात होता है कि पत्नी को घर की व्यवस्था का पूर्ण अधिकार दिया जाता है और उसका कथन सबको मान्य होता है। नारी के सम्मान की यह प्रक्रिया न केवल वैदिक युग में ही थी, अपितु उपनिषद्काल और स्मृतिकाल में भी यह प्रक्रिया अविच्छिन्न रही।

अतएव मनु का कथन है कि-

**यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवता।**[2]
**यत्रैतास्तु न पूज्यन्ते, सर्वास्तत्राफलाः क्रियाः।।**

अर्थात्-जहाँ नारियों का सम्मान होता है। वहाँ देवताओं का निवास होता है और जहाँ इनका निरादर होता है। वहाँ सारे कार्य निष्फल हो जाते हैं।

**तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।**[3]
**भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च।।**

अतएव स्त्रियों को अलंकार, वस्त्र, भोजन आदि से सदा संतुष्ट रखना चाहिए। जिस परिवार में पत्नी से पति और पति से पत्नी संतुष्ट होते हैं वह परिवार सदा फूलता-फलता हैं।[4]

यदि स्त्री प्रसन्न नहीं रहती है तो उस परिवार में सुसंतान नहीं हो सकेगी।[5] ब्राह्मण ग्रन्थों में स्त्री के महत्व के विषय में अनेक महत्वपूर्ण सन्दर्भ प्राप्त है। जैमिनीय उपनिषद् ब्राह्मण में स्त्री को सावित्री अर्थात् गायत्री के तुल्य पवित्र और पूज्य बताया गया है।[5] स्त्री को अर्धाङ्गिनी अर्थात् पुरूष का आधा भाग कहा गया हैं। वह पुरूष की आत्मा का आधा अंश है।[7]

---

1. ऋग्० 10.85.46
2. मनु० 3.56
3. मनु० 3.59
4. मनु० 3.60
5. मनु० 3.61
6. स्त्री सावित्री। जैमि०उप०ब्रा० 27.10.17
7. अर्धो वा एष आत्मनः यत् पत्नी। तैत्ति० ब्रा० 3.3.3.5

तैत्तिरीय ब्राह्मण का कथन है कि यज्ञ आदि धार्मिक अनुष्ठान पत्नी के साथ ही किए जाते है। पत्नी के बिना किया गया यज्ञ अपूर्ण माना जाता है। स्त्री सहधर्मिणी है, अतः यज्ञ आदि में उसकी उपस्थिति अनिवार्य है।

**स्त्री-शिक्षाः**- वेदों के अध्ययन से ज्ञात होता है कि वैदिक काल में स्त्रियों की शिक्षा की सुचारू व्यवस्था थी शिक्षा का आरम्भ उपनयन संस्कार से होता था। इस संस्कार के बाद ही बालक या बालिका को वैदिक-संहिताओं के अध्ययन का अधिकारी माना जाता था। गुरूवों के आश्रम में रहकर बालकों की भॉंति ही कन्याएँ भी ब्रह्मचर्य का पालन करती हुई यज्ञोपवीत, मौंजी, मेखला और वल्कल धारण करती थी।[1]

जो छात्राऍं अधिक से अधिक संहिताओं के मन्त्रों की पण्डिता होती थी। बह्वृची की उपाधि दी जाती थी। पाणिनी के अनुसार यजुःसंहिता की कठ-शाखा का अध्ययन करने वाली छात्रा को कठी कहा जाता था। महाभाष्यकार पतंजलि के अनुसार आपिशलि के व्याकरण का सम्पूर्ण अध्ययन करने वाली छात्रा "आपिशला" कहलाती थी। इसी प्रकार काशकृत्स्नी द्वारा मीमांसा-विषयक पुस्तक का अध्ययन करने वाली छात्रा को "काशकृत्स्ना" कहा गया है और वे उच्चशिक्षा प्राप्त करती थी। अतएव ऋग्वेद में स्त्री को 'ब्राह्मा' कहा गया है[2] इसका अभिप्राय यह है कि वह ज्ञान की श्रेष्ठता के कारण यज्ञ आदि में ब्राह्म का स्थान ग्रहण करती है और विविध संस्कार करा सकती है।

क्षत्रिय-कन्याएँ धनुर्वेद, अर्थात् युद्ध-विद्या की भी शिक्षा लेती थी। सेना में भर्ती होकर युद्ध में भाग लेती थी। इसी पुष्टि घोषा द्वारा रचित ऋक्-संहिता मण्डल 10 के 39 और 40 सूक्त से होती है।

**मन्त्रद्रष्टा ऋषिकाएंः**- वेदों में आध्यात्मिक शिक्षा के अतिरिक्त कन्याओं को काव्य-कला, शस्त्रविद्या, ललित-कलाओं, संगीत, नृत्य, अभिनय आदि की शिक्षा देने की भी व्यवस्था की गई है। अतएव काव्यकला के आधार पर वे मंत्रद्रष्टा ऋषिकाएँ हुई।

ऋग्वेद और यजुर्वेद में नारी के युद्धकला में पारंगत होने का वर्णन है। यजुर्वेद में उसे अजेय (अषाढा), विजेता (सहमाना), सहस्त्रों प्रकार के पराक्रम करने वाली (सहस्त्रवीर्या), कहा गया है।[3] इन्द्राणी को सेनानी (सेनापति) कहा गया है।

---

1. पुराकल्पे कुमारीणां मौंजीबन्धनमिष्यते।
   अध्यापनं च वेदानां सावित्रीवचनं तथा।। -स्मृतिग्रन्थ।
2. स्त्री हि ब्रह्मा बभूविध। ऋग्० 8.33.29
3. अषाढा, सहमाना, सहस्रवीर्या। यजु० 13.26

इन्द्राणी वै सेनायै देवता। सैवास्य सेनां सं श्यति।[1]

ऋग्वेद में उल्लेख है कि स्त्रियों की भी सेना होती थी। असूरों की स्त्री सेना ने इन्द्र से मोर्चा लिया था।[2] उपनिषदों और स्मृतियों में भी नारी के गौरव का उल्लेख है। गार्गी ने महर्षि याज्ञवल्क्य से शास्त्रार्थ किया था और ऐसे टेढ़े प्रश्न पूछे थे, जिनसे महर्षि याज्ञवल्क्य भी चकरा गये थे। यह संसार किस में ओत-प्रोत है? लम्बे प्रश्न-उत्तर के बाद याज्ञवल्क्य ने अन्तिम उत्तर दिया था कि यह सारा संसार अक्षर ब्राह्म में ओत-प्रोत है।[3]

**स्त्री के यज्ञ अधिकार:-** वैदिक-संहिता-काल में नारी अपने नर के साथ या स्वतन्त्ररूप में भी यज्ञ करने की पूर्ण अधिकारिणी थी या नहीं इस शंका एवं सन्देह का निराकरण करना परमावश्यक है। इस सम्बन्ध में अथर्वसंहिता में कहा गया है। "मैं शुद्ध, पवित्र यज्ञ की अधिकारिणी इन स्त्रियों को विद्वानों के हाथों में पृथक्-पृथक् रूप में प्रसन्ता से अर्पित करता हूँ।[4] उपर्युक्त मन्त्र में पठित योषित् (नारी) शब्द के लिये आये "शुद्ध" ,"पूता" तथा "यज्ञिया:" विशेषण इस बात के स्पष्ट प्रमाण है कि उस समय नारी समाज यज्ञ में भाग लेने एवं अपनी योग्यतानुसार यज्ञ करने तथा दूसरों से यज्ञ कराने का पूर्ण अधिकार रखता था। यदि ऐसा न होता तो "यज्ञिया" विशेषण के स्थान पर किसी अन्य विशेषण का प्रयोग योषित्-शब्द के साथ किया जाता। यज्ञाधिकार से स्पष्ट है कि उस समय का प्रबुद्ध नारी समाज वैदिक संहिताओं के अध्ययन-अध्यापन, मनन, चिन्तन में भी पूर्ण स्वतन्त्र अधिकार था। ऋक्संहिता के पंचम मण्डल में[5] तथा प्रथम मण्उल के 27वें सूक्त में[6] संयुक्त रूप से यज्ञ करने का उल्लेख है। अथर्वसंहिता में "योषितो" यज्ञिया: इमा:" द्वारा स्पष्ट रूप में नारी के यज्ञ अधिकार की पुष्टि की गयी है।[7]

शतपथ ब्राह्मण का महत्वपूर्ण कथन है कि जब तक मनुष्य का विवाह नहीं होता है तब तक वह अपूर्ण है। पत्नी को प्राप्त करने पर ही वह पूर्ण होता है।[8] इसका

1. तैत्तिरीय सं० 2.2.8.1
2. स्त्रियो हि दास आयुधानि चक्रे०। ऋग्० 5.30.9
3. एतस्मिन् नु खलु-अक्षरे गार्गि-आकाश ओतश्च प्रोतश्च। बृहदा० उप० 3.8
4. शुद्धा: पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक् सादयामि।
   यत्काम इदमभिषिन्चामि वोखहमिन्द्रो मरूत्वान्त्स ददातु तन्मे।।
5. वृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनास: सचन्त।
6. संजानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन्।
   रिरिक्वांसस्तन्व: कृण्वत स्वा: सखा सख्युर्निमिषि रक्षमाणा:।।
7. अथर्व० 11.1.17-18
8. यावत् जायां न विन्दते, असर्वो हि तावद् भवति। शत०ब्रा० 5.2.1.10

अभिप्राय यह है कि मनुष्य पत्नी के बिना एकांगी है। जीवन की पूर्णता पत्नी की प्राप्ति पर ही होती है। तैत्तिरीय ब्राह्मण का यह भी कथन है। कि स्त्री लक्ष्मी का रूप है।[1] जिस तरह लक्ष्मी की पूजा की जाती है उसी प्रकार स्त्री का आदर करना चाहिए। स्त्री को ग्राहपत्य अग्नि बताया है।[2] इसका अभिप्राय यह है कि स्त्री ही वंश परम्परा चलाती है। संतति परम्परा, गृहस्थ की ज्योति, गृहस्थ का वैभव और अमोद-प्रमोद सब कुछ पत्नी पर ही निर्भर है शतपथ ब्राह्मण ने अतएव स्त्रियों के अपमान निरादर और ताडन आदि को निन्दनीय बताया है।[3] अथर्ववेद ने स्त्रियों को ही नहीं अपितु कन्याओं के भी निरादर और ताडन को अशिष्ट बताया है। पारस्कर आदि गृह्यसूत्रों में स्त्रियों की गौरवमयी गाथा का गुणगान किया गया है।[4]

✦✦✦

1. श्रिया वा एतद् रूपं यत् पत्न्यः। तैत्ति० ब्रा० 3.9.4.7
2. जाया गार्हपत्यः (अग्निः) ऐत० ब्रा० 8.24
3. न वै स्त्रियं घ्नन्ति। शत० 11.4.3.2
4. तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः। पार० गृह्य० 1.7.2

# हिमालयी गङ्गा का वैशिष्ट्य (एक पर्यालोचन)

**डॉ. नारायण प्रसाद भट्टराई**
वेदविभाग
**श्रीमाता वैष्णो देवी गुरुकुल, कटड़ा (जम्मू-कश्मीर)।**

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयोनामनगाधिराजः।**[1]

मनुष्य देवत्व गुण और अवस्था से युक्त होना चाहता है, और महाकवि कालिदास ने भारत वर्ष के उत्तर भूभाग में स्थित केदारखण्ड को देवताओं की आत्मा की कहकर इस क्षेत्र की पुराकालीन शास्त्रोक्ति को प्रमाणिकता के साथ नवीन आयाम में प्रतिष्ठित किया है। वैदिक काल से लेकर पौराणिक तथा वर्तमान कालखण्ड तक अनेकानेक असंख्य ऋषि-मुनियों ने अपने साधना काल को इसी भूभाग में परिपूर्ण किया है। जिसमें सनकादि, वेदव्यास से लेकर आद्य जगद्‌गुरु शंकर तक इस क्षेत्र को अपनी तपोबल से पवित्र किया है। केदारखण्ड से निसृत असंख्य जलश्रोतों को अपने गर्भ में समेट कर गोमुख से सागर तक यात्रा करने वाली माँ गङ्गा के जल को निर्मल और पावन कहा गया है। आधुनिक विज्ञान भी यह सिद्ध कर चुका है कि मलीनजल की स्वतः शुद्धिकरण की प्रक्रिया गङ्गाजल में विश्व की सभी नदीयों की अपेक्षा अधिक है। पुराणों ने सम्पूर्ण विश्व में भारत को तथा भारत में भी देवभूमि केदारखण्ड (वर्तमान उत्तराखण्ड) को अधिक श्रेष्ठ स्वीकारते हुए निरन्तर इसका गुणानुकीर्तन किया है। पुराणों में परम पुनीत इस भू-भाग को अत्यन्त पुण्यदायक तथा बहुविध प्रकार से शुभकारक कहा गया है। इसकी यही पुण्यशीलता तथा नैसर्गिक सुन्दरता निरन्तर देवताओं को यहाँ खींच कर ले आती है तथा उन्हीं देवगणों का वासस्थल होने के कारण महाकवि कालिदास सदृश बहुशः कविगणों ने इसे देवभूमि, देवस्थलि, देवालय, देवतात्मा इत्यादि कई गौरवपूर्ण सम्बोधनों से सम्बोधित किया है।

पुराणों में केदारखण्ड की पावन भूमि की अलौकिक महिमा का गान करते हुए इसे देवगणों के लिए भी अत्यन्त दुष्कर कहा गया है।[1] स्कन्दपुराण के केदारखण्ड

1. मेघदूतम् 1/2

में इस भूमि के उत्कर्षता का वर्णन करते हुये शिव पार्वती से कहते हैं कि 'हे पार्वती! यहा श्रेष्ठ भूमि नहीं अपितु स्वर्ग-गमनार्थ स्वर्ग द्वार है।'[1] पुराणों में इस भूमि की विशिष्टता का प्रतिपादन करते हुए कहा गया है कि -

**काश्यादीनि च तीर्थानि गदितानि बहुनि वै।**
**तानि सर्वाणि सेवन्ते मूर्तिमन्त्रस्तपः स्थिताः।।**[2]

अर्थात् कहे गये काशी, गया मथुरा इत्यादि अधिकांश तीर्थ मूर्तिमान् होकर तपस्या करते हुए इस पुण्य भू-भाग का सेवन करते हैं। इस क्षेत्र की आध्यात्मिक तथा प्राकृतिक सुन्दरता को चित्रित करते हुए कहा गया है कि-

**अनेकतीर्थसंयुक्तं नानापुण्यवनैर्युतम्।**
**अनेकशतसाहस्त्रशिवलिङ्गविराजितम्।।**

**नाना नदीनदाकीर्णं नदीसङ्गमशोभितम्।**
**नाना क्षेत्रैः पुण्यतमं नाना पीठेषु यन्त्रितम्।।**[3]

उत्तराखण्ड की पावन भूमि अनेकों तीर्थों पुण्यजनों, सैकड़ों-हजारों शिवलिङ्गों नदी सङ्गमों, नदी-नदों तथा अनेकों पीठों से परिपूर्ण सम्पूर्ण भूमण्डल में विलक्षण है। इसी प्रकार केदारखण्ड की विविध जल धाराओं का परिचय उनके कार्य तथा गुण-वैशिष्ट्य के आधार पर देते हुए पुराणों में कहा गया है कि-

**तस्मिन्नेव महाक्षेत्रे धारास्ताः गदितास्तुयाः।**
**नामतः श्रृणुताः सर्वाः पुण्याः पापप्रणाशनाः।।**

**मधुवर्णातु या धारा मधुगङ्गा तु सा स्मृता।**
**या वै क्षीरवहा धारा क्षीरगङ्गाद्वितीयका।।**

**मध्यमा या श्वेतवर्णा स्वर्गद्वारा प्रकीर्तिता।**
**महाजलौघा सुश्रोणिधारा मन्दाकिनीमताः।।**

**केदारनिलयख्याता गङ्गाकेदारसंज्ञकाः।**
**निसृता गङ्गया देवि पूर्वशेषगृहीतया।।**[4]

---

1. स्कन्दपुराण/केदारखण्ड/40/27
2. स्कन्दपुराण/केदारखण्ड/40/28
3. स्कन्दपुराण/केदारखण्ड/40/33
4. स्कन्दपुराण/केदारखण्ड/40/31-32

यहाँ उत्तराखण्ड की अनेक जलधाराओं को विलक्षण शक्ति सम्पन्न तथा स्नान मात्र से ही शिवसामुज्य प्रदान करने वाली बताते हुए उनके गुणानुरूप ही कहा गया है कि– मधुवर्ण वाली धारा मधुगङ्गा है, इसी प्रकार दुग्धराशि लेकर बहने वाली धारा क्षीरगङ्गा, बीच की श्वेतवर्ण वाली धारा स्वर्गद्वारा, महान् जलराशि वाली धारा मन्दाकिनी तथा केदार भवन में प्रख्यात केदारगङ्गा कही गई है।

